# प्रस्तावना

जीविते अप्रतीक्षिताः दुःखजनकाः संभवाः कियन्तः! स्वार्थता रक्तबन्धस्य निष्प्रभावः रक्तवर्णः, सत्यपरिवेषं स्वीकृतवन्ति असत्यानि इत्यादीनां विना बहुःविकारभावान् प्रतिफलितं जीवितम् इदं वयं सर्वे जानीमः।

मनुजस्य संतृप्तिः कुत्र वर्तते?

रुजा कलुषिते मनसि एकः स्निग्धः स्पर्शः। हृदयसमाश्वासकम् किञ्चिद् वाचः। पिपासा पीडितम् आतुरं प्रति अमृतसमाना एका जललवकणिका इत्यादिकं अत्यन्तदुर्लभं इदानीन्तनकाले।

मनुष्येनैव निर्मितं अनपेक्षितं कार्यम्, किं बहुना, स्वातन्त्र्यं सम्पादयितुं श्वासवायुं विना कम्पिता चामस्यां नूतनसमयमात्रायां, किन्तु मनुष्यस्य सर्वप्रश्नपरिहारमापिनीमिव, सर्वप्रश्ननिर्वर्तकसामर्थ्यजन्यम् अदृश्यरूपे स्थितं कश्चित् वस्तु प्रतिभासरीत्या अस्माकं पुरतो वर्तते इति कार्यं जीवां न स्मरयन्ति। निमीलितेक्षणात् सर्वं वस्तुतां द्रष्टुमिच्छन्ति सर्वे मानवाः। यदा सर्वे जनाः अनिमिषाभ्यां लोचनाभ्यां इदं सर्वं कार्यं वीक्षितुं आरभन्त तदा प्रश्नान् परिहर्तुं प्रारभ्यन्त।

अस्माकं दुःखस्य कारणं किं? इदं दुःखस्य निवारणमार्ग किं? ये वस्तुज्ञानात् मनुजस्य बाह्ये आन्तरिके च लोके संभवितुं सर्वस्य कार्यस्य प्रभवः इति सः ज्ञातुं आरभते। तादृशरीत्या सर्वाणि ज्ञानानि अन्तर्भवन्ति अस्माकं भारतस्य पैतृकसम्पदः इति अमन्यत उपनिषद्ज्ञानेन।

अस्मिन् पुस्तके तादृशज्ञानसंबन्धानि सम्यक् वस्तुतत्वानि सहृदयानां पुरतः, विशेषतः अस्माकं युवजनहृदयस्य पुरतः निधातुं इच्छामि।

अस्य ग्रन्थस्य बीजावापाय (उद्यमस्य बीजावापाय), तथा अस्य ग्रन्थस्य सम्पूर्णतायाः कारणकार्याणि च मां नितरां परिपोषितुं उद्युक्तेभ्यः सर्वेभ्यः, प्रथमतया यूणिवेर्सिट्टि ग्राण्ट् कम्मीषन् प्रति, मम आदरणीयं गुरुवर्यः श्रीमान् प्रोफसर् वासुदेवन् पोट्टि महोदयं प्रति, तद्वत् अस्य पुस्तकस्य रचनाकार्य सम्बन्धेषु सर्वेषु कार्येषु साहाय्यं कृतवतां सर्वेषां जनानां मम कृतज्ञता न्यवेदयामि। अस्य उद्यमस्य (पुस्तकस्य) सर्वसामग्रीसङ्कलनाय सहयोगकर्तॄणां च मम कृतज्ञतां प्रकटयाम्यहं। मम इतः पर्यन्तेकाले समार्जितस्य वेदान्तज्ञानस्य सारं लोकजनमङ्गलप्रार्थनया अहं भवद्भ्यां पुरतः समर्पयामि। वेदान्त महासागरस्य केवलं एतानि जलकणमात्राण्येव इदम् अक्षरजालम् तत् समस्तं वस्तुना क्रोडीकर्तुं अहं न समर्था। तत् वेदान्तविषये यावत् अधिकं ज्ञातुं शक्यते तावदेव तत् सर्वं न्यूनमेव भवति इति।

प्रकाशस्य अभाव एव अन्धकारः। इदम् अन्धकारं लघुदीप ज्वालय। प्रकाशयामश्चेत् अपगतः स्यादन्धकारः। तत् ईश्वरस्वरूपे प्रकाशे लघ्वीमिमां वाणीं समर्पयाम्यहम्।

डॉ. एम्. एस्. षीबा

........✷♦✷........

श्रीः

शिवधामः श्रीकण्ठेश्वरम्

तिरुवनन्तपुरम्

22-06-2015

प्रो.आर्. वासुदेवन् पोट्टि

सेवानिवृत्तः वेदान्ताचार्यः

## शिक्षायां उपनिषदां प्रभावः - आधुनिकसङ्कलने

**आशंसावचांसि-**

सप्तदशभिरध्यायैः संराथितोऽयं ग्रन्थः शिक्षायामुपनिषदां प्रभावः- आधुनिकसङ्कल्पने इति कृतनामधेयः डॉ. एम्. एस्. षीबानामिकया कैरलीतोऽनूदिजः। कैरल्यामपि तयैव विदुष्या रचितो ग्रन्थः शिक्षाशास्त्रतत्वानि वैदिकेषु उपनिषत्सु लब्धाङ्कुराणि तदैव पल्लवितानि पुष्पिताणि च, परन्तु प्राश्चाल्यैः स्वोपज्ञानीनि साटोपमुद्धोयन्ति। अधीतिबोधाचरणप्रचारणानी चतस्रो दशाः नैषधीयमहाकाव्य नामतो निरदिशत्। ज्ञानग्रहण प्रयोग प्रचारणानीते पाश्चात्यैः कृतसङ्केता इमा दशाः। श्रवणमनननिदिध्यासनानि ब्रह्मसाक्षात्कारोपायाः इति 'आत्मा वा अरे द्रष्टव्य श्रोतव्यो निदिध्यासितव्य' इति श्रुतिरत्रानुसन्धेया। किं बहुना आधुनिकैः शिक्षाशास्त्रिभिराकलितानि प्रायः सर्वाण्यपि तत्वानि उपनिषत्सु क्वचित् स्फुटानि क्वचिच्च व्यङ्ग्यमर्यादया प्रकाशितानि दृश्यन्ते। अतः शिक्षा प्राणाल्यो निर्दिष्टानि अवधेयानि अत एव उपादेयानि अनर्घरत्नवत् भास्वराणि वैदिकग्रन्थेषु, विशिष्योपनिषदादिषु

नित्यनूतनानीव तत्वानि तत्र निर्दिष्टानीति सुस्पष्टः उपनिषदां शिक्षाशास्त्रे प्रभावः इत्यत्र संशयलेशोऽपि नास्ति।

भारतीयस्य आर्षसंस्कारस्य विशेषाः भारतीयसंस्कृतिमधिकृत्यैकं पुनर्विचिन्तनम्, भारतीयार्षसंस्कृतेः जीवानुभूतानामुपनिषदां जीवनदर्शनानि। शिक्षणस्य शिक्षकस्य च लक्षणं मुख्या उपनिषन्मन्त्राः उपनिषत्प दस्यार्थविचारः, संस्कृताध्ययनाध्यापकानां केरलेषु, आधुनिकी दशा केरलेषु, इत्येवमादयोऽनेके विषयाः विचारविषयीकृताः अस्मिन् ग्रन्थे। पारम्परिकः श्लोकोऽपि अत्र प्रस्तवमर्हति- "आचार्यात्पादमादत्ते, पादं शिष्यः स्वमेधया, पादं सब्रह्मचारिभ्यः, पादं कालक्रमेण तु।" इति। कालक्रमेणेति वचनं लोकव्यवहाराचारादिदर्शनेत्यर्थकम्।

ग्रन्थेऽस्मिन् ईशावास्यादयःमुख्या उपनिषदः नामग्राहं गृहीत्वा प्रतिपाद्यविषयविवेचनपुरस्सरं प्रपञ्चिताः। अतः क्वचित् क्वचित् पौनरुक्त्यं प्रतीयेत। शास्त्रेषु पौनरुक्त्यं न दोषाय कल्पेत, किन्तु गुणायैवा रसनीये काव्ये एव पौनरुक्त्यादयो दोषाः वर्जनीयतयान्निरूपिताः किञ्च ग्रन्थकारस्याभिप्राया न पूर्णतया अभ्युपेयाः भवेयु। वैयक्तिकचिन्तासरणौ सर्वे समानचिन्ताधाराबद्धा इति वक्तुं न शक्यते। वैषम्यमेव स्वतन्त्रचिन्तायां प्रतिभासेत। एवमनेके विषया अत्र प्रस्तोतव्या निर्दिष्टव्याश्च सन्ति। तत्सर्वमाशंसकमार्गाद् बहिर्भूतमिति नात्र विस्तरः क्रियते। विरामस्तावत् ।

आचार्यवान् पुरुषो वेद इति छान्दोग्यश्रुतिः ज्ञानार्जनसरणौ गुरुरनुपेक्षणीय इति निर्दिशति। श्रद्धाराद्धगुरुः श्लथीकृतदृढ एव शास्त्रार्थरहस्यमवगन्तुं शक्नोति। अस्य ग्रन्थस्य रचयत्री च डॉ.एम्.एस्.षीबामहोदयापि गुरुसेवया निरन्तरध्यानेन च किञ्चिदिव शास्त्रार्थमधिगतवती। स्फुलिङ्गरूपेण प्रकाशमुपगतं ज्ञानज्योतिः क्रमेण निदिध्यासनमारुतेन दिव्यज्योतीरूपमुपगतम्। तच्चात्र ग्रन्थमामूलदां स्फुरति उपनिषदां निरन्तराध्ययनेन तदर्थविचारेण ययुपगतं तदेवात्र ग्रन्थे प्रकाशते। अयं ग्रन्थः उपनिषतत्त्वजिज्ञासूनां तत्रत्य शैक्षिकतत्वानां तदवग-मोपायानां तेषां प्रयोगपदवीमानेतुमुपदेयानां मार्गांश्च यावच्छक्यं प्रकाशयितुमुपकारकं भवेत्। अत्र इतोऽप्यधिकं विविज्ञेयमस्तीति मतिमुपस्थापयितुं उपकारोऽयं ग्रन्थः। अतः जिज्ञासवः शिक्षाशास्त्रिणः शिक्षकाश्च ग्रन्थमिममुपादद्युरिति मे विश्वासः। ग्रन्थस्य तत्कतया च मदीयानि आशंसावचांसि।

हंसोहि क्षीरमादत्ते तन्मिश्रावर्जयत्यपः।
सन्तः सदसद्व्यक्तिहेतवोऽत्र प्रमाणम् ।।

इति शुभाशंसकः

आर्. वासुदेवन् पोट्टि।

........✷♦✷........

# विषयसूचिका

प्रथमः अध्यायः

उपोद्घातः / 8

द्वितीयः अध्याय

भारतीयसंस्कारस्य वैशिष्ट्यम् / 14

तृतीयःअध्यायः

भारतीयसंस्कृतिमधिकृत्य किञ्चित् पुनर्विचिन्तनम् / 17

चतुर्थः अध्यायः

भारतस्य आर्यसंस्कृतिः / 26

पञ्चमः अध्यायः

उपनिषदः / 33

षष्ठः अध्यायः

उपनिषदां जीवितदर्शनानि / 38

सप्तमः अध्यायः

उपनिषदां अध्ययनसम्बन्धिनः सङ्कल्पाः / 47

अष्टमः अध्याय

अद्यतनस्य विद्याभ्यासवीक्षणानि / 55

नवमः अध्यायः

आधुनिकविद्याभ्यासे  उपनिषदां: प्रामुख्यम् / 65

दशमः अध्यायः

**कतिपयशैक्षणिकवीक्षणानि / 72**

एकादशः अध्यायः

**शिक्षणस्य समकालिकवीक्षणानि / 76**

द्वादशः अध्यायः

**केरलस्य शिक्षणवीक्षणानि / 85**

त्रयोदशः अध्यायः

**शिक्षणस्य लक्ष्यम् / 93**

चतुर्दशः अध्यायः

**प्रमुखोपनिषन्मन्त्राः / 101**

पञ्चदशः अध्यायः

**कतिपयशिक्षणवीक्षणानि / 116**

षोडशः अध्यायः

**केरलस्य सांस्कारिकवैशिष्ट्यानि / 127**

सप्तदशः अध्यायः

**संस्कृताध्ययनं आधुनिकसमाजे - एकमवलोकनम् / 134**

**ग्रन्थसूचिका / 139**

……..✷♦✷……..

प्रथमः अध्यायः

# उपोद्घातः

एकैकोऽपि मानवः प्रतिनिमेषमन्विष्यमाणं भवति आत्मसुखम् । तदेव साधयितुं कृतभूरिपरिश्रमाः वयं सर्वेऽपि । सुखस्याप्राप्तावेव बालाः क्रन्दन्ति । विवाहः, उद्योगः सन्यासः किंबहुना मनुष्येण ज्ञात्वैव क्रियमाणाः सर्वेऽपि दुराचाराः सुखमनुभवितुमेव । मनुष्याः विभिन्नैर्रीतिभिः सुखमन्विषन्ति – केचन सुखार्थं प्रभूतं धनमार्जयन्ति, केचित्तु ज्ञानार्जनं कुर्वन्ति,कतिपयमानवाः शास्त्रकुतुकिनो भवन्ति, अपरे तत्त्वज्ञाः भवन्ति ।

एतत्समस्तमपि कार्यं केवलं सुखप्राप्तये एव । परन्तु सर्वमपि सुखमनित्यमित्यतः किञ्चिद् कालान्तरं पुरुषः तस्माद् सुखहेतोः पूर्णतया विरक्तो जायते । अत एव सुखार्थी सः तं परित्यज्य अन्यद् नूतनं किमप्यन्विष्य गच्छति। यतो हि आर्जितं किञ्चिदपि यथार्थसुखहेतुर्नास्त्येव । यथार्थसुखात् कोऽपि पुरुषः कदाचिदपि विरतिं न प्रयाति । तादृक् किमपि वस्तु अस्ति वा न वेति अन्वेषणमेव वास्तविको विद्याभ्यासः । इत्यत: ज्ञेयस्य वस्तुनः ज्ञानसम्पादनमेव तत् । इदमेव शाश्वतसमाधानं विद्याभ्यासलक्ष्यम्।

इतरेभ्यः राष्ट्रेभ्यः विभिन्नं किञ्चिद् पैतृकमावहति भारतीयसंस्कृतिः । अस्मत् पूर्वजैः शश्वत्सुखं विद्यां च कथं परिज्ञातमार्जितञ्चेत्यादि कार्याणि

तस्मादेव पैतृकसम्पदः अस्माभिरवगम्यते । भारताम्बायाः अस्याः कालनिर्णयायापि वयमशक्ताः । अनादिकालादेव एतद् राष्ट्रं, भारतखण्डं, भारतवर्षं, आर्षभारतं, आर्यावर्तमित्याद्यभिधाभिर्सुविख्यातमासीत् । पूर्वं अजनाभनामधेयमिदं राष्ट्रं ऋषभपुत्रस्य भरतस्य स्वर्गप्रयातेर्परं भारतमितिनाम्ना प्रथितमिति केषाञ्चिद् मतम् । कालातिवर्ति इदं भारतमित्य भिधेयम धुनावधि यथावत्तिष्ठति ।

भारतसंस्कृतेः अविनाशहेतुरस्त्ययं सनातनसंस्कारः। शास्त्राभ्या ससमुत्पन्न। व्युत्पत्तिरित्यपि संस्कारपदस्यार्थः। धर्मग्रन्थाः इत्येतदतिरिच्य वेदकालेषु भारतं प्राविष्टानामार्याणां ज्ञानसंहितानामेषां वेदानां आध्यात्मिकं लौकिकमिति द्वे मुखे स्तः । ऋगादयः चत्वारः वेदाः, उपनिषदः, स्मृतिसमानाः धर्मशास्त्रग्रन्थाः,सांख्यादिदर्शनग्रन्थाः, इतिहासं पुराण मित्यादिषु सर्वेष्वपि आर्षग्रन्थेषु भारतसंस्कृतिः सन्निविष्टा दृश्यते ।

आत्मसाक्षात्कारम् एव ज्ञानार्जनस्य आत्यन्तिकं लक्ष्यम् । अस्माभिर्क्रियमाणानि सर्वाण्यपि कर्माणि एतदेकमेव लक्ष्यं मनसि निधायस्युरिति भारतीयसंस्कारः अस्मान् प्रबोधयति । एतद्सकलमपि आत्मशुद्धये, ईश्वरसाक्षात्काराय, अधर्मविनाशाय च प्रवृत्तमासीत् । एवं कश्चन यस्मिन्कस्मिन्नपि कर्मणि व्यापृतो भवतु तस्य मनसि अयमेव भावः जाज्वल्यते स्म ।

यत्किमपि कर्म करोतु मनुजः तत्समस्तमपि आत्मशुद्धिः तथा आत्यन्तिकमोक्षः च स्यादिति उद्बोधयत्यस्माकं संस्कृतिः । या च भारतीयसंस्कृतेरस्य विशेषः ।

अनेके जनाः देश।न्तर।द।गतेनसम।कृष्ट।न।म् अस्माकं संस्कारेषु आकृष्टचित्ताः अभवन्निति सर्वैरङ्गीकृतं तथ्यमेव । गुरुभक्तिः, ईश्वरसमर्पणं, सत्यमहिंसा, आस्तेयं, विनयः, दया, वैराग्यं, त्यागं, धर्मनिष्ठा, सहिष्णुतेत्यादिमानविकमूल्यानि परिरक्षितुं दत्तश्रद्धाः आसन् भारतसंस्कृतेः संरक्षकाः अस्मत् पूर्वजाः ।

ॐ सहनाववतु सह नौ भुनक्तु सह वीर्यं करवावहै
तेजस्विनावधीतमस्तु मा विद्विषावहै ।।

ज्ञानस्वरूपमिदं ब्रह्म ज्ञानं प्रदाय अज्ञानान्धकारादस्मान् परिरक्षतु, ग्राह्यबुद्धिं दत्वा नौ (आवाम्) परिपालयतु, ज्ञानस्योर्जमावां मिलित्वा स्वायत्तीकुर्वः । परस्परवैरिणः कदापि मा भवेव । इत्यर्थवानयं उपनिषन्मन्त्रः कं वा पुरुषं कर्मरहितं, निष्ठुरं, स्वार्थञ्च भावयेन्?

प्राचीनानां वरिष्ठगुरोः शिष्याः प्रज्ञामेधादयः आधुनिकमनुष्येभ्यः अल्पमपि न्यूना नासन् । सकलशास्त्रमेखलासु आयोधनविद्यादिषु च

पारदृश्वानः आसन्नस्मदाचार्यवर्याः । ज्ञानस्य परमोच्चकाष्ठामवाप्य आत्मज्ञानसाक्षात्कारिणः आसन् तत्कालिका: प्रायशः सर्वेSपि आचार्याः । शङ्करबुद्धपरमहंसविवेकानन्द-प्रभृतयः श्रेष्ठाः ततपथमनुगच्छन्त्यः गुरुश्रेणयो भवन्ति ।

कस्यचिद्राष्ट्रस्य विद्याभ्यासव्यवस्था यावती श्रेष्ठा भवति तावद्संस्कारयुक्ताः भवन्ति तद्राष्ट्रवासिनोऽपि । जनानामरोगता, शान्तिः, परस्परविश्वासः एतत् सकलमपि विद्याभ्यासमाश्रित्य सन्तिष्ठते । जनेषु कालानुरूपज्ञानं, संस्कारश्च प्रपूरयितुं विद्यया शक्यते । भारतीयजनतायाः ईश्वरविश्वासः, पुण्यस्थानानि, मन्दिराणि, यागादयश्च जनहृदयान्यत्यन्तं परिपावितानि । भारतस्यायमेव संस्कारः तथा भारतीयाणां मनोवाक्कर्मसु निहितमियं पवित्रता एव भारताम्बायाः यशः, वीर्यं, शक्तिश्च । अत्रत्य ईश्वरीयसंस्कारस्यापचयः यावदारब्धं तस्माद् प्रभृतिरेव स्यात् भारतीयाः दुखावर्न्ताः सञ्जाताः ।

गुरुकुलविद्याभ्यासप्रणाल्या ब्रह्मचारिणः विद्यार्थिनः कियद्वा श्रेष्ठताः अवाप्तवन्तः स्युः?तत्कालेषु विजनवनान्तरेषु निवसद्भिः तप-स्विभिर्गुरुभिर्साकमेव शिष्यैः उषितव्यमासीत् । गुरुं निषेव्य अतीवनिष्ठया अनुष्ठितपावनकर्मपद्धतयः आसन् तत्कालिकी विद्याभ्यासव्यवस्थितिर्नाम । ब्रह्मचारिणः अन्तेवासिनः भिक्षामुपजीव्य गुरुं गुरुपत्नीञ्च संसेव्य ईश्वरध्यानेन,

निरन्तरशास्त्राभ्यासेन च यद् वा ज्ञानमार्जितं तदेव ज्ञानं तान् धार्मिकान् संतृप्तान् सुखिनश्चाकरोत् । आचार्यास्तु सर्वशास्त्रपारङ्गताः आत्मज्ञानिनश्चासन् ।

पौराणिककाले पुरुषस्य चतुर्षु आश्रमेषु प्रथमः अवर्तत ब्रह्मचर्यं नाम। आश्रमेऽस्मिन् विद्यार्थी ब्रह्मचर्यव्रतमनुष्ठाय इन्द्रियनिग्रहं कृत्वा गुरोर्पर्णशालामध्यवसति । निष्ठया ज्ञानं समार्जयति च ।

वेदपुराणादयः दैविकतायाः औन्नत्यस्य च श्रेष्ठसोपानानीत्यतः विद्यार्थिभिः तत्सर्वं ज्ञातव्यं पठितव्यं च । अधर्माचरणे सति एषां पापफलानि स्वैरनुभवितव्यानीति परिज्ञानं पापेभ्योऽस्मान् निवर्तयति ।

विद्यालयेषु प्रथमकक्ष्यायाः प्रभृति छात्रैः पठिताः श्रेयः सूचिकाः, महात्मनां जीवनचरितानि, अस्माकं पूर्वसंस्कारस्य स्रोतांसि, इतिहासपुराणकथाः, सुभाषितानि च आधुनिकविद्याभ्यासे नष्टप्रायाः । तेन जाताः जायामानाश्च सांस्कारिकच्युतयः महतीं विनाशपरम्परामावहन्ति ।

सुखलोलुपस्य मनुजस्य जीवने यदि आत्मशान्तिः नास्ति तर्हि तत्र पुनर्विचिन्तनं अवश्यं कार्यम् । यानि यानि कुत्र कुत्र विनष्टानि तत्सर्वं पुनः स्थापिनीयं परिहरणीयञ्च । हि परम्परागतां संस्कृतिं सम्पन्नतां च परित्यज्य

विस्मृत्य च अन्यत्सर्वमवाप्य किं वा कार्यम् ? पैतृकमिदं त्यक्त्वा इतरराष्ट्रसंस्कृतिमनुगच्छन्तः जनाः विपदः प्रति स्वयमेव उपगच्छन्ति ।

भारते आसेतुहिमालयं जीवन्तं प्रतिजनं निरीक्ष्य अमेरिक्कादेशस्य चिक्कागोनगरीं गत्वा प्रभाषणं कृत्वा भारतं प्रत्यागतः स्वामी विवेकानन्दः अत्रत्य जनान् उद्बोधितवान् यत् भारतं चिरायाविनश्य तिष्ठतीत्यत्र तस्य जीवनाडी आध्यात्मिकता एकैव कारणमिति । अतः अत्रत्य संस्कृतिरेव भारतीयानां सुखदायिनी भवति । तस्मादेव हेतोः आध्यात्मिकज्ञानप्रदायिन्यः शास्त्रशाखाः वैज्ञानिकसम्पदश्च क्रमशः अस्माकं विद्याभ्यासमेखलास्वावहनीय मित्येतद् अवश्यं कार्यम् ।

........✷♦✷........

द्वितीयः अध्यायः

# भारतीयसंस्कारस्य वैशिष्ट्यम्

संस्कारसम्बन्धि सर्वमपि कार्यं धर्मास्पदं भवति । विश्वप्रथितेतिहासे महाभारते धर्मस्य वैशिष्ट्यं नितरामुद्घुष्यते । कामक्रोधभयलोभमोहादिभिः धर्मः कदापि न परित्याज्यः । आत्मीयता सर्वत्र आत्मानं द्रष्टुमेव प्रेरयति । यदा परकृत्येषु न्यूनताः पश्यन्ति तदैव युद्धस्य असहिष्णुतायाश्च बीजङ्कुरः समुत्पद्यते। महाभारते पौनःपुन्येन प्रोक्तं वाक्यं भवति 'यतो धर्मस्ततो जयं' इति । न केवलं महाभारतमपितु वेदपुराणेतिहासादयः सर्वेऽपि ग्रन्थतल्लजाः धर्मस्य निस्तुलं महत्त्वं प्रतिपादयन्ति उच्चैरुद्घोषयन्ति च ।

सामान्याः अपि प्रह्लाद-शबरी-हनुमन्-जटायु-ध्रुव-पून्तानप्रभृतयः महात्मानः धर्ममाचरन्तः तेनैव आत्मसायूज्यमवापुः । समस्त-विज्ञानभाण्डागारेष्वपि विलीनं वर्तते धर्मो नाम तत्थ्यम् । अस्मै धर्मायैव अस्मत् पूर्वजाः नैजं जीवनं जुजुहुः। अर्थकाममोक्षाः पुरुषार्थाः धर्मेण सह सम्बध्दा एवावतिष्ठन्ते ।

पौराणिककालेषु कस्यचन बालस्य अध्ययनकालः उपनयनेन प्रारभ्यते। उपनयनात्परं गुरुणा सः बालः शिष्यत्वमुपगच्छति। द्वादशभिः चतुर्दशभिर्वा वर्षैः चतुर्दशविद्याः अपि सम्यग् गृहीतवान् शिष्येण समावर्तनक्रियया गृहस्थाश्रमाय प्रतिनिवर्त्तते। सः पुनः स्वेच्छया सन्यासं वा

वानप्रस्थं वा साक्षात् स्वीकर्तुमपि शक्नोति । वस्तुतः तत्र चतुर्दशविद्यानां स्वायत्तीकरणात् नियतजीवनशैलीमेव प्रमुखतया अधीते ।

गुरुकुलसम्प्रदाये सर्वेऽपि अन्तेवासिनः उच्चनीचभेदैर्विना ब्राह्ममुहूर्ते उत्थाय नैजानि तथा आचार्यसम्बन्धीनि ईश्वरसम्बन्धीनि च सर्वाण्यपि कार्याणि निर्वहन्ति स्म । आत्मज्ञानाग्नौ विस्फुटमनस्काः आसन् ते छात्राः । सकलवेदशास्त्र सम्प्रदायाः एवं व्यवहाराश्च आत्मज्ञानाधिष्ठिताः सञ्जाताङ्करपल्लविताः चासन् ।

गुरुकुलवासेन कश्चिद् उत्तमः पौरः भवति । तद्वारा समाजस्य राष्ट्रस्य च प्रियहितकारि भवति। सामान्यजनेभ्यः अज्ञाताः विद्याः तेन गुरुकुलाध्ययनेन आर्जितः स्युः । वनान्तरेषु पर्वतसानुषु एवं विजनप्रदेशेषु वा ईदृशानि बहूनि गुरुकुलानि भारते विद्यन्ते स्म ।

कस्यचिन्मनुष्यस्य सर्वप्रमुखसम्पद्भवति तस्य संस्कारः । स च संस्कारः एकैकस्यापि मनुष्यस्य न केवलं व्यवहारे वाक्षु कर्मसु वस्त्रधारणेषु आहाररीतिषु भावनासु समस्तमेखलास्वपि प्रस्फुरितं भवति। परिपावनेन तथा मातृकाध्ययनेन एव कश्चिद् संस्कारसम्पन्नो जायते ।

कस्यचन अध्ययनं मातुः उदरादेव समारभ्यते । तत्र विद्याभ्यासजीवनकालः प्रमुखं स्थानमावहति । यदि कस्यचन व्यक्तेः

अध्ययनकालः अनर्थकोऽसमीचीनश्च स्यात्तर्हि आजीवनं तस्य प्रतिफलितं तस्मिन् द्रष्टुं शक्यते इत्यतः कस्यचन छात्रस्य अध्ययनजीवनं व्यक्तेः समाजस्य तद्वारा तद्वारा सम्पूर्णराष्ट्रस्य च विकासाय कल्पेत ।

धार्मिकमूल्यवन्तः श्रेष्ठाः पौराः समाजस्य हितमेव कुर्युः । तेन कस्य वा च्युतिः सम्भवति ? इमान्येव मानुषिकमूल्यानि सदाचाराश्च सर्वदर्शनैरपि प्रकाश्यन्ते । विकासः सर्वेषां जीवने नूनमपेक्षते एव । तथापि विकसनत्वरायां चिरायानुवर्त्यमानमस्मद्- पारम्पर्यं पैतृकं संस्कृतिश्च कदापि न विस्मरेयुः ते महान्तः । तेषां समेषां विस्मरणस्य दोषाः एव अद्यतन विद्याभ्यासे छात्रेषु च दृश्यन्ते । 1927 तमे वर्षे 'यङ् इन्ड्या' द्वारा महात्मा गान्धिदेवः एवमब्रवीत् यद् विद्यालयछात्रेषु अस्माभिः दृष्टाशुद्धिः, जीवने सर्वत्र दृश्यमानानास्थाः, अतिप्रमुखकार्येषु अपि विद्यार्थिभिः प्रदर्श्यमानं लाघवं च अधुनावधि येन पैतृकेण छात्राः परिपोषिताः तस्य पैतृकस्य समाजान्निष्कासनावमाननादिभिः हेतुभिः संजाताः विपदः एव इति मम विश्वासः इति । एवञ्चेद् साम्प्रतं भारतस्य अवस्था न ततो भिन्ना ।

शान्तिपूर्णाः कियन्तो वा आशयविस्मयाः भारतीयाचार्यैः समार्ज्य लोकहिताय परिकल्पिताः । निस्तेजशेचक्षुर्भ्यः तेजोविधाय भारतीयानां सनातनधर्मः भवसागरतारणोपाधिरिव वर्तते ।

……..✷♦✷……..

तृतीयःअध्यायः

# भारतीयसंस्कृतिमधिकृत्य किञ्चित् पुनर्विचिन्तनम्

कुत्र कुतो वा मनुजस्योद्भवः ? यदि सः मातुरुदरे संभाव्यते तर्हि चतुराद्यधिकतरो वा गुरुपरिक्रमणकालपर्यन्तमेवं दीर्घं मनुष्य जीवितमात्रस्थितिरिरिति निर्णये हेतुः कः तस्य सम्पूर्णाः अनुभवाः, इष्टानिष्टाः, विविधचिन्ताधाराः, विकाराः, आक्षीपथाः, तात्पर्याणि इत्येवमादीनि सर्वे जीवनस्वभावाः व्यवहाररीतयः च, नव-दश मासान्तिके गर्भावस्थायां इत्यादिकं सर्वमपि कथं पूर्णतया तथ्यतः वा निर्मीयते।

जननजीवनमरणयोः मध्ये तदनन्तरमपि किमपि स्यात् खलु ? तथैव शैशव बाल्य कौमार यौवन वार्धक्यादिदशाः पूर्वं तदन्तरं अपि किमपि ईदृश्यः दशाः न स्युः इति को दृष्टवान् ? तथैव जाग्रत्स्वप्नसुषुप्त्यवस्थानां समनन्तरमपि अन्याः काश्चन श्रेणयः भवितुमर्हन्ति किल? अस्माकं चिरपरिचितानामपि पञ्चेन्द्रियाणां व्यवहारेभ्यः कश्चनान्यो व्यवहारः वस्तुतया प्रवर्तते वा ? तादृशरीत्या धवलप्रकाशस्य वयलट्, इन्डिगो, नीलं, हरितं, पीतं, ओरज्, रक्तं (VIBGYOR) इत्यादि घटकवर्णात् पूर्वं अन्ते च घटितं अल्ट्रावयलट्, इन्फ्रारेड्, आदि वर्णयोः द्रष्टुम् अस्माकं नयने अशक्ते भवति इति कार्यं केन हेतुना इति चिन्तितव्यम्। विंश हैंट्स्, किलो हैंट्स् परिमाणात् पूर्वं

अन्तिमं च भवितानां शब्दतरङ्गाणां स्वीकारे अस्माकं श्रोत्रेन्द्रियान् किं असमर्थः भवति ? भूमिं अन्तरीक्षञ्च तरित्वा एकः सञ्चारः मानवनयनाभ्यायां साधितव्यं किल ? अस्माकं चिरपरिचितानामपि पञ्चेन्द्रियाणां व्यवहारेभ्यः कोऽप्यन्यं व्यवहारः वस्तुतया प्रवर्तते वा? संसारस्य सर्वाणि संवेदनानि ज्ञापयितुं किमस्माकं ज्ञानेन्द्रियाणां शक्तिरस्ति ?

जीवनमस्माकं प्रहेलिकावद्भवति यच्च किञ्चित्कालं जीवित्वा अनिच्छयापि वयमस्मद्देहं परित्यजमः । किमर्थं वयं मरणमतिजीवितुं शक्ताः न प्रभवेम ? तर्हि अवश्यं तत्र अतीन्द्रियः कश्चन व्यापारः प्रवर्तते खलु ? प्रायशः सकलभीतीनां व्याधीनाञ्च मृत् कारणमज्ञानमेव स्यात् ।

एकाकी गच्छन् कश्चन पुरुषः सायंकाले मार्गमध्ये कञ्चिद् सर्पं दृष्ट्वा तस्माद् बिभेति । विजनप्रदेशे अकस्माद्दृष्टः सर्पः कस्य वा मनसि भीतिं न जनयति ? यदा अत्यन्तं भीतिरस्माकं मनसि जायते तदा शरीरे चेतसि च जायामानाः विपरिणामाः अचिन्त्याः अनेकविधापदः प्रत्यस्मान्नयति । कदाचिद् निमेषार्धेन अस्माकं जीवनमपि नष्टं जायेत । परन्तु किञ्चिद्कालानन्तरं वयं प्रत्यभिजानीमे यद् सर्पवद् भासितं तद्वस्तु यथार्थसर्पः नासीत् किञ्च केवला रज्जुरासीदिति । तस्यां वेलायां हि पूर्वजातानां चेतोविकाराणां देहास्वास्थ्यानाञ्च सरलता च अवभासते स्वयमनुभूयते च ।

एकेन दीपस्य सान्निध्येन सः प्रत्यभिगच्छति सर्पस्य मिथ्यात्वम् । परं केवलरज्ज्वा सर्पवद्भासित हि वास्तविकसर्पदर्शने जायमानः विकारविक्षोभाः तस्य पुरुषस्य मनसि जनयितुं शक्तम् । किमेतस्य कारणम् ? अज्ञता ह्यस्य हेतुः। अज्ञानमिति तिमिरेण विलिप्तः पुरुषः ज्ञानात्मकदीपेन ऋतं पश्यत्यवगच्छति च ।

अत्र अयथार्थं किमासीत् ? याथार्थ्यं किम् ? यथार्थवस्तुतामभिज्ञातुं का शक्तिः प्रैरयत् ? पञ्चेन्द्रियाणि कदाचिद् कति विकलदृश्यान्यस्मान् दर्शयन्ति ? ते सर्वदा यथार्थं ज्ञानं अस्मभ्यं प्रयच्छति वा ? वस्तुतत्वं दुरवगमम् सिद्ध्यति एषां पञ्चेन्द्रियाणां  अक्षमतया । अस्य मनोहरं निदर्शनं डाँ. स्पेन्सर् जोन्सन् महोदयस्य 'हू मूव्ड् मै चीस्' (who moved my cheese) नामकग्रन्थस्यावतारिकायां डाँ. टि. आर्.एस् मेनोन् ददाति । तदित्थं- सूर्यः पूर्वस्यां दिशि उदयते, पश्चिमदिशि अस्तं च याति, आकाशः अर्धवर्तुलाकृतिर्भवति, तस्य च सीमानः सन्ति, तस्य च वर्णः नीलः, नक्षत्रग्रहादयः अतिसूक्ष्मप्रकाशकणिकाश्चेत्यादयः भूमेः भ्रमणपरिक्रमणवेगमपि ज्ञातुं एतानि इन्द्रियाणि अशक्तानि भवन्ति। एकैकस्य वस्तुनोः आकृति वर्णरुच्यादयः इतरेभ्यो व्यत्यस्ताः भवन्ति। इदं सर्वस्यापि इन्द्रियाणां असत्यबोधनं उपदर्शयति।

कदाचित् पूर्णं किञ्चिद्वस्तु शून्यमित्यवभासेत तथा अत्यन्तं ऋजु वक्रवत्, यथार्थं ज्ञानं अज्ञानवत्, अज्ञानं च ज्ञानवच्च भासेत । सर्वं विजानतः पुरुषान् जातु वयं अज्ञानिनः तद्वत् अज्ञानिनं ज्ञानी इत्यपि चिन्तयामः । आसंसारं बयो टेक्नोलजी, नानो टेक्नोलजी इन्फर्मेषन् टेक्नोलजी इत्यादीनां नूतनसाङ्केतिक विद्यानां विपुलप्राचुर्येऽपि अज्ञानान्धकारं बहुधा अस्मान् ग्रसति । स्वप्नेऽप्यविचिन्त्यानि कियन्ति वा कार्याणि नवीनपरीक्षणनिरीक्ष णैर्ज्ञायिते । अद्य एकसमयमात्रेष्वपि मानवानां समवस्थां तत्समये एव समानं कर्तुं इव किं किं गवेषण फलानि सन्ति। कियन्ति कियन्ति वा मोहजालानि अत्र सन्ति मनुष्यः किं किं न साधयति । मनुष्यस्य अ बीजानि शीतीकृत्य अनेक कालं संरक्षणं कृत्वा च, अवश्यसमये उद्धाभपात्रे निक्षिप्य तादृशरूपप्रसवः एवं मनुष्यप्रज्ञामपि अत्युदासंघटनयन्त्रापि कणिकापरीक्षणानि, दैवकणानि इत्यादो किं किं।

किन्तु परं कालपरिणामे इमाः सृष्ट्यः कथं विपरिणमन्ति इति वयं न जानीमः। तथापि जननमरणादीनि तेन विदूरीकर्तुं न शक्तमेतावता । किमत्र मरणं नाम सकलस्य अन्त्यं उत प्रारम्भः । अस्य प्रश्नस्य समाधानं केन दीयते ।

भूमौ मनुष्यस्य आविर्भावकालादेव सः जनिमृतिहेतुः अन्विष्यमाणोः वर्त्तते। अस्य निस्सन्देहं समाधानं को वादातुं शक्नोति । आधुनिकशास्त्रस्य प्रयोगविधयः वा तदर्थं साहाय्यमकुर्वन् ।

मनुष्यमनसः अतिसङ्कीर्णता तथा अहं बोधः च क इति सूक्ष्मतया व्यक्ततया च विशदीकर्तुं इदानीमपि आधुनिकशास्त्रम् अशक्तं दृश्यते। यदा मनुष्यः तस्य प्रश्नान् निवारयितुं आरभते तदा अनेकानि अपरप्रश्नाֺतराणि उदयं कुर्वन्ति इति कार्यं सत्यम् अस्ति। इन्द्रियाणां मनसश्च अत्यन्तपरिमितिरस्ति आयुर्मात्रभवितो मनुष्यः अद्भुतपरतन्त्रः सन् तिष्ठत्यधुनापि। अधिकाधिकविज्ञाने आर्जिते हि अस्माकं परिमितप्रज्ञा मार्गविधातं कुर्वन्ति। भूमिं सौरयूथं गालक्सिं किं बहुना अपराणि सर्वाणि प्रापञ्चिकघटकानि तरित्वा यावत् मनुष्यबुद्धिः प्रयाणं कर्तुं आरभते तावत् मनुष्यः पुनः पुनः अपरम् अपरं महाद्भुतप्रहेलिकायां निपतति स्म। तत् सर्वं समये,

न तत्र सूर्यो भाति न चन्द्रतारकं
नेमा विद्युतो भाति कुतोऽयमग्निः
तमेव भान्तमनुभान्ति सर्वं
तस्य भासा सर्वमिदं विभाति [1]।।

(तत्र सूर्यः न भाति, चन्द्रतारकं न, इमाः विद्युतः न भाति, अयम् अग्निः कुतः, तम् भान्तम् एव सर्वम् अनुभाति।)

इत्याद्युक्तयः अस्मान् चिन्तयितुं प्रेरयन्ति । शास्त्रदीपं पुरस्कृत्य अग्रेयामी पुरुषः पुरतो विद्यमानं अन्धकारनिहवं दृष्ट्वा अत्यन्तं बिभेति । यद्यपि सर्वा विघ्नान् निवार्य अग्रतो गच्छति तथापि तदग्रे मरणमिति महासमस्या सलीलं विलसति । भवन्तु नाम सङ्कीर्णोपकरणानि यथेच्छं

[1]Katha Upanishad(5.15)

तथापि मृत्युमुखात् कस्यापि मुक्तिः नास्त्येव । चिकित्सया शमयितुं शक्याश्चेदपि कैश्चनामयैः पुरुषः रक्षां न प्राप्नोति । मनुष्यः स्वयं प्रपञ्चसीमानः अन्विष्य क्लिश्नाति यतो वाचो निवर्तन्ते अप्राप्यमनसा सह इति श्रुति घोषः को वा शृणोति।

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते[2] ।।

इति शान्तिमन्त्रः कुत्र ध्वन्यते ? मनोबुद्धीन्द्रियाणां ज्ञानपरिमितिः सर्वैरपि स्वयं अवगन्तव्या । तासु च वेलासु –

अनुपश्य यथा पूर्वे प्रतिपश्य तथापरे
सस्यमिव मर्त्यः पच्यते सस्यमिवाजायते पुनः[3] ।।

अविद्यायामन्तरे वर्तमानाः स्वयंधीराः पण्डितम्मन्यमानाः
दंद्रम्यमाणा परियन्ति मूढाः अन्धेनैव नीयमाना यथान्धाः[4] ।।

न जायते म्रियते वा विपश्चिन्नायं कश्चिन्न बभूव कश्चित्
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे[5] ।।

[2]Taittiriya Upanishad(Anuvaka-4,Brahmananda valli

[3]Katha Upanishad(1.6)

[4] Ibid(2.5)

[5] Ibid(2.18)

इत्यादिषूक्तिषु वयं सुष्टु न आकृष्टाः । भौतिकपदार्थाः सर्वेऽपि अस्थिराः तरङ्गरूपाश्च भवन्ति । मूर्तरूपेषु दृश्यमानं सकलमपि वस्तुतया रूपभावरहितास्थिरवस्तूनि भवन्तीत्येव सत्यम् । यदि मूर्तवस्तूनि एतावत्सङ्कीर्णकरणितर्हि सूक्ष्मवस्तूनां सङ्कीर्णताः किमु वक्तव्य! सूक्ष्मप्रपञ्चमिदं मापयितुं कः समर्थः? युक्तिविचाराः केवलं वैयक्तिकवीक्षणाः एव । वीक्षणानि सत्यानि वा असत्यानि वा भवितुमर्हति । ऊर्जसंरक्षणनि यमानुसारं निखिलान्यपि प्रापञ्चिकवस्तूनि ऊर्जप्रभेदाः एव । तानि च निर्मातुं विनाशयितुं वा अशक्यानि । परं इतररूपभावादिषु विपरिणमयितुमर्हाः । तदेव ऊर्जं पदार्थैः सह सम्बद्धाः ।

किन्तु इमान् सवान् पदार्थान् अथवा प्रकृतिं वा प्रपञ्चं वा स्रष्टुं पातुं च कश्चन शक्तिविशेषः भवति खलु । अस्ति तर्हि सा शक्तिः का ? आधुनिकशास्त्रमपि इममेवाशयमुपगच्छन्नस्ति । एवं तर्हि किमस्ति ब्रह्म ? 'अयमात्मा ब्रह्म', 'प्रज्ञानं ब्रह्म', 'अहं ब्रह्मास्मि', 'तत्त्वमसि' इत्यादीनि महावाक्यानि किम् अनुशासति ? भगवद् गीतायामेवमुच्यते –

आश्चर्यवत्पश्यति कश्चिदेनं आश्चर्यवद्वदति तथैव चान्यः
आश्चर्यवच्चैनमन्यः शृणोति श्रुत्वाप्येनं वेद न चैव कश्चित् [6]।।

[6] Bhagavad Gita(2.29)

आश्चर्यमेव सर्वत पूर्यते । आश्चर्याणां हि सर्वेषां नियतमुत्तरं प्राप्तव्यमेव । ईदृक्समस्याः पुरुषं नितान्तं क्लेशयन्ति ईश्वरोक्तिरिव हैसन्बर्ग् महोदयस्य प्रस्तावनाः शास्त्रलोकं सकुतुकमवाशृणोत् । तस्य अनिश्चितत्वसिद्धान्तं शास्त्रियवीक्षणानि विचाराश्च समस्ताः नव्यमकरोत् । एकस्यार्धं ज्ञाते अपरार्धं ततोऽप्यधिकं सङ्कीर्णतां प्रति नयति । किमेतान् सन्तुलितान् करोति ।

एतत्सर्वं किञ्चित् नूतनसाहोदर्यबीजं न वपति वा ? तर्हि सहोदराः क्व ? "एकं सत् विप्राः बहुधा वदन्ति" इति ऋक्मन्त्रः तदा च सत्यं भवति । यदि सर्वेऽपि सोदरास्तर्हि तत्साहोदर्यं प्रकटयितुं सुशक्तमैक्यं किन्न जायेत तेषु । इर्विन् ष्रोडिङर् महोदयस्य 'तरङ्गयान्त्रिकी विद्या' 'अनिश्चितत्वसिद्धान्त'ञ्च संयोज्य 'आधुनिकक्वाण्डं' सिद्धान्त आविर्बभूव । एकस्य कणस्य प्रवेगं स्थानञ्च युगपत् प्रमाणयितुं न शक्यम् । प्रपञ्चस्य सर्ववस्तून्यपि चलन्ति सन्ति । इदं ब्रह्माण्डमेव भारतीयैः जगच्छब्देन परामृष्टम्। अस्य परामर्शस्य स्रोतः कुत्र?

यदि वयं किञ्चिद् श्रद्धां निदध्मस्तर्हि मनुष्यस्यान्तः बहिश्च निश्चिताविष्कारः क्रोडीकरणञ्च द्रष्टुं शक्यते । एषां समेषां पृष्ठतः कस्यचन बोधसत्तायाः अनुपमपाटवं सन्दृश्यते खलु । एवञ्चेद् मनुष्यप्रज्ञा तदीयैन्तरालः केवलं निगूढा वर्तेत किं ? प्रकृतेः मनोहारितायां क्रोडीकरणे च ईदृग्पटुत्वं सन्निहिता वर्तते इत्यस्माकं दृष्टिगोचरं वस्तुतत्त्वम् । तथा च बाह्यबोधसत्ता

आन्तरिकबोधसत्ता च न खल्वेकः । मरणेन कश्चिद् स्वदेहं त्यक्त्वा भिन्नभावादीन् स्वीकुर्याद् । तथापि जीवसत्ता अविनाशिनी नित्यधा तिष्ठति ।

यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति
एवं मुनेर्विजानीत आत्मा भवति गौतमः[7] ।।

इति मन्त्रानुसारं यथा वृष्ट्यम्बु पर्वतस्य विविधैर्मार्गैः यथा इतरप्रदेशेभ्यः प्रवहति तथा विभिन्नधर्मानुष्ठानवतः जीविनः भ्रान्त्या अनुगच्छन्तः परमात्मानं न विजानीयुः । परं निर्मलं वृष्टिपातः जलाशयेषु यथा पतति तस्मिन् लीयते च तद्वत् परमात्मबोधालाभं महात्मनां जीवोऽपि तस्मिन् विलीयते ।

कति वा स्मृतयः मनुष्याणां मनसि स्फुरन्ति ? तथापि तस्यार्धमपि सार्थकं कर्तुं प्रयत्नलेशोऽपि न क्रियते तेन ।

इन्द्रियाणि हयान्याहुर्विषयस्तेषु गोचरान्
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः [8]।।

एतत्सर्वं किमस्मान् बोधयति ? इत्थमसंख्यानां प्रश्नावलीनामुत्तरं दीयते उपनिषद्भिः ।

……..✷♦✷……..

[7] Katha Upanishad(4.15)

[8] Ibid(3.4)

चतुर्थः अध्यायः

# भारतस्य आर्यसंस्कृतिः

क्रिस्तोः प्राक् उपद्वादशसहस्रं इन्डो – यूरोप्यन् भाषाभाषिणः 'आर्याः' इति प्रथामाप्तवन्तः कतिपये जनाः 'हिन्दिकुष्' द्वारा भारतमायाताः । तत्र च ते पौराणिकस्य कस्याश्चित् नागरिकतायाः अवशिष्टां ददृशुः, ततश्च तत्रैव वस्तुमारभन्त । ते च तस्मिन् प्रदेशे विस्मयावहाः विकासाः साङ्केतिकवैदग्ध्यं, विपणनमार्गाश्च गूढमुपस्थापिताः इत्यवागच्छन् । भारताधिनिवेशाद् प्रागेव अत्यन्तं विपुलं भिन्नं च संस्कारैः सम्पन्नाः ते सिन्धूनदीतटसंस्कारेण सह स्वेषां संस्कृतिं संकलय्य नवीनां कञ्चिद् संस्कृतिं समुद्पादितवन्तः ।

आर्याः भारतस्य उत्तरपश्चिमदिशा उत्तरभारते वेदकालारम्भात् पूर्वमेव प्राविशन् । आर्यसमुदायस्य एकं चरित्रमेव ऋग्वेदे द्रष्टुं शक्यते । भारतस्य संस्कृतिः अनादिरिति कथ्यते । सा च कालदेशातीता वर्तते । भारतागमनाद् पूर्वमेते गोधननामधेयाः आसन् । आचारानुष्ठानेषु यागविध्यादिषु च अतिनिष्णाताः इमे आर्याः गावजाश्वश्वानादीन् पशूनपि अपालयन् ।

क्रिस्तोः प्राक् पञ्चशताधिकसहस्रवर्षेभ्यः प्रागेव समारब्धायामस्यां मन्त्रप्रणाल्यां प्रकृत्युपासकौ उभावपि अतीवसहवर्तिनावास्ताम् । निखिलचराचरेषु अवस्थितेन तुरीयचैतन्येन सह एषां मन्त्राणां सहसम्बन्धः आसीत् । पञ्चभूतानि प्रकृतिशक्तयश्च तेषामाराधनामूर्तयः आसन् ।

द्रविडविभागस्तु भारतस्य पूर्वनिवासिनः तथा च ते भारतस्य उत्तरदेशे पौराणिककालादारभ्यैव निवसन्ति स्म परं आर्याणां अधिनिवेशेन क्रमशः दक्षिणभारतं समाश्रिताः तथा भारतवासिषु पञ्चविंशतिः प्रतिशतमेव द्राविडाः अन्यत् सर्वमपि आर्याधीनमासीदिति केचन विश्वसन्ति । आन्ध्रा, केरला, तमिल्नाड्, कर्णाटका इत्यादिदेशेषु वसन्तः दक्षिणात्याः द्रविडाः क्रमशः तेलुग्, कैरली, तमिल्, कन्नडादि भाषासु व्यवहारं कुर्वन्तः आसन् ।

हारप्पा, मोहन्जोदारो इत्यादीनां नागरिकतासंस्कारः द्राविडानामव दानमिति मन्यन्ते विद्वांसः । प्रकृतिशक्तीराराधयन्तः द्राविडाः आर्याणां समावेशनानन्तरं देवताराधनाद्यनुष्ठानानि अन्वकुर्वन् । तैः स्वायत्तीकृतां संस्कृतिः हिन्दुत्वत्वञ्च आर्याणां योगदानमासीत् । या संस्कृतिरत्र प्रसारिता तां अनुपमामतिविशिष्टां श्लाघ्यां संस्कृतिं पैतृकञ्च विश्वस्मिन् क्वचिदपि द्रष्टुं न शक्यते । परञ्च अस्य महत्त्वस्य हेतुः आत्मीयताधिष्ठितः सनातनसंस्कार एव स्यात् । श्रुतिस्मृतिपुराणादयः परिपूताः ग्रन्थाः न्यायव्याकरण ज्योतिषादिशास्त्राणि चैतत् सर्वमपि भारतस्य अविभाज्यघटकत्वेन परिलसन्ति। सत्यम् अहिंस दया- दान-त्याग-धर्मादिगुणात् आवहतीयं संस्कृतिः ।

अस्याः अक्षयसंस्कृतेः मूलभूतकारणं अत्रत्यो विद्याभ्याससम्प्रदायः आत्मीयता च स्याताम् । बहूनां राष्ट्राणां पतनेऽपि भारतस्य हृदयमनस्यूतं

स्पन्दते स्म । तमसा समावृतमपि देशं प्रकाशपूर्णं कर्तुं दीप एकः शक्नोति । वेदोपनिषदादयः वैदिकज्ञानदीपाः इममेव प्रकाशं भारतीयजनतायै निरन्तरं प्रयच्छन्तः वर्तन्ते ।

## वेदाः

'विद्' धातोः निष्पन्नस्य वेदशब्दस्य अयमर्थः – वेद्यते अनेन इति । अपौरुषेयाख्याः इमे अनादयः इति मन्यन्ते । तथा च आर्याणां ज्ञानसंहितानां समाकक्तवेनः अभिप्रायः भवन्त्येते वेदाः । इमे एव वेदाः ब्रह्मणा स्वयं निर्मिताः इत्यपि कश्चिदस्ति। यज्ञनिर्वहणार्थं ब्रह्मा वेदान् ससर्जेत्यपरे । लौकिकमाध्यात्मिकं च ज्ञानसत्र सन्निबद्धान्।

एतदुभयमपि आर्याणां विश्वासाः, मनोविचाराः सामूहिकजीवनञ्च न केवलमारचयति अपि तु भारतीयचिन्ताधारायाः प्रभवकेन्द्रत्वेनापि सन्तिष्ठते । महाविष्णुं द्वापरयुगान्ते बादरायणव्यासरूपेण अवतीर्य वेदं चतुर्धा व्यभज्यत । ते एव ऋग्यजुस्सामाथर्वाणः। प्रत्येकं वेदस्यापि संहिता ब्राह्मण आरण्यकोपनिषदिति चत्वारःविभागाः, शिक्षा कल्प व्याकरण निरुक्त ज्योतिषछन्दांसीति षड् वेदाङ्गानि वर्तन्ते । तत्र संहिता प्रकृतिदेवतार्चनात्मकानां ऋचां समूहः भवति । मन्त्ररूपाः इमाः ऋचः वैदिककथाधिष्ठिताः । ब्रह्मसम्बन्धीनि ब्राह्मणानि । यज्ञानां प्रयोगविधयः एव अत्रत्य प्रतिपाद्यविषयः ।

श्रेयसे प्रेयसे च कर्तव्यानां यागादिविधीनां समुल्लेखः दृश्यते ब्राह्मणेषु । तस्मादेव इदं कर्मकाण्डमित्यभिधीयते । ब्राह्मणस्यैव अन्तिमभागः भवति आरण्यकानि । कर्मपाशात् विमुक्तः कश्चन वानप्रस्थं स्वीकृत्य वनान्तरेषु स्वस्थमुपविश्य मननं कथं कार्यमिति निर्दिशन्ति आरण्यकानि । एषां प्रमुखविषयः आध्यात्मिकरहस्यानि यागानामान्तरिकतत्वानि च भवन्ति । एतदेव रहस्यविद्याख्यम्।

वेदस्य अन्तिमभागएव वेदान्तोपनिषन्नामभ्यां अभिधीयते । सत्यान्वेषणपरकाः उपनिषदः अरण्यकानि च मिलित्वा ज्ञानकाण्डसंज्ञा प्रथन्ते।

## ऋग्वेदः

अतिप्राचीनाः अनादिसंभवाः भवन्ति वेदाः । तत्रापि प्राचीनतमः ऋग्वेदः। आर्याणां काबूल्तः यमुनातीरं यावत् विद्यमानपूर्वचरितं ऋग्वेदात् ज्ञायते । यमुनातटं प्राप्ताः तद्देशीयैः मिलित्वा हिन्दुसंस्कृतिं निरमापयत् । मोहन्जोदारो प्रान्तेभ्यः उपलब्धाः महायोगिनां देवतानां च सपर्याः आर्यैः दृष्टिगोचरीकृताः । मन्त्रसमूहः विद्यते ऋग्वेदः । ऋग्वेदीयसूक्तानामर्थः सर्वप्रथमं यास्कनिरुक्तेन सायणाचार्यस्य वेदार्थप्रकाशेन च विव्रियते । ऋग्वेदः दशभिः मण्डलैः विभक्तः। आहत्य तत्र 10472 सूक्तानि विद्यन्ते ।

क्रिस्तोः पूर्वं पञ्चशताधिकद्विसहस्रवर्षतः द्विसहस्रवर्षाणां चान्तरे एव ऋग्वेदस्य रचनाकालः भवितुमर्हति । इन्द्राग्निवरुणसोमादीनां देवतानां स्तुतिपरकोऽयम् ऋग्वेदः । गृत्समदविश्वामित्रात्रिभरद्वाजप्रभृतयः एषां मन्त्रद्रष्टारः ऋषयो भवन्ति । अष्टाष्टकात्मकत्वेनापि अष्टकाभ्यामपि विभज्यते ऋग्वेदः। तस्य हि शाकलं, बाष्कलं, आश्वलायनं, शाङ्खायनं , माण्डूकायनमिति शाखाः अपि सन्ति । सूक्तानि प्रायशः स्तुतिपरकाश्चेदपि दशमे मण्डले तस्माद् भेदमपि स्पष्टं दृश्यते । पौराणिकमतानुसारं ब्रह्मा एव वेदानां कर्ता । कृतयुगे इमे ब्रह्मणा पुत्रेभ्यः प्रदत्ताः। तद्वारा वेदान् द्वापरयुगे ऋषयः स्वायत्तीचक्रुः ।

## यजुर्वेदः

भारतसंस्कारस्य प्रमाणग्रन्थेषु वेदेष्वन्यतमो भवति यजुर्वेदः । वेदव्यासशिष्यः वैशम्पायनः यजुर्वेदस्य सप्तविंशतिशाखाः निरमापयत् । वेदव्यासः वेदान् चतुर्धा विभज्य ऋग्वेदं पैलाय यजुर्वेदं वैशम्पायनाय साम जैमिनये अथर्ववेदं सुमन्तवे च प्रोवाच । प्रायेण यजुर्वेदस्य देवतास्तुतयः ऋग्वेदादुद्धृताः । यजुर्वेदस्य अर्धांशः गद्यं अपरार्धं पद्यञ्च भवति । प्रमुखतया अस्य शुक्लयजुर्वेदः कृष्णयजुर्वेदः इति द्वे शाखे स्तः ।

क्रमनिबद्धः सुष्टु विन्यस्तः वेदभागो भवति शुक्लयजुर्वेदः तद्भिन्नः कृष्णयजुर्वेदः । द्वयोरपि संहितासु सोमयागः, दर्शपूर्णमासौ, राजसूयं, अश्वमेधः

इत्येतानां यागविधयः प्रतिपाद्यन्ते । काठकसंहिता, मैत्रायणीसंहिता, कापिष्ठलसंहिता, तैत्तिरीयसंहिता चेति कृष्णयजुर्वेदस्य संशोधनग्रन्थाः । आपस्तम्बहिरण्यकेशिनौ तैत्तिरीयस्य द्वे शाखे स्तः ।

शुक्लयजुर्वेदसंहिता वाजसनेयी संहितेत्यपि नाम्ना प्रथते । अस्य काण्व माद्यन्दिनाख्ये द्वे शाखे । उर्वशीपुरूरवसोराख्यानं, शकुन्तलादुष्यन्तोर्पुत्रस्य भरतस्य कथा, जनमेजयस्य कथा चेत्यादयः अस्य कतिपयांशाः एव । यजुर्वेदविधयः सम्यगनुष्ठीयते तर्हि सर्वकामाः परिपूर्यन्ते ।

## सामवेदः

सामवेदमन्त्राः ऋग्वेदमन्त्रैः साकं नितरां साम्यं भजन्ते । वेदेऽस्मिन् केवलं पञ्चसप्ततिसूक्तानि विना अन्यत्सर्वाणि ऋग्वेदीयानि भवन्ति । अस्य पूर्वार्चिकं, उत्तरार्चिकञ्चेति भागद्वयं विद्यते । प्रायशः सहस्राधिकशाखाः सन्ति चेदपि कौथुमं, राणायनीयं, जैमिनीयञ्चेति तिस्रः शाखाः एव सम्प्रति उपलभ्यन्ते । वेदेषु लघुतमवेदो भवति सामवेदः । परं श्रेष्ठताविषये अयं सर्वदा अग्रतः तिष्ठति । वेदेषु सामवेदोऽहमिति भगवान् गीतायां प्रस्तौति। सङ्गीतात्मकाः भवन्त्यस्य स्तुतयः ।

## अथर्ववेदः

अथर्वाङ्गिरसत्यभिधेये अथर्ववेदे आभिचारादिक्रियाः सङ्कलिताः । इतरे वेदाः इव अत्र यज्ञादिक्रियाकलापानां अमितप्राधान्यं न दीयते । अस्य शौनकपिप्पलाख्ये द्वे शाखे । षट्सु वेदाङ्गेषु शिक्षायामुच्चारणनियमाः प्रतिपाद्यन्ते। यागविधीन् अधिकृत्य कल्पे एवं वाचां निष्पत्त्यादिकं, व्याकरणे वैदिकशब्दानां अर्थविचारः निरुक्ते, वैदिकानां मन्त्राणां छन्दःसम्बन्धीनि कार्याणि छन्दसि तथा ग्रहाणां विषये ज्योतिषे च प्रतिपाद्यन्ते ।

……..✷♦✷……..

# उपनिषदः

वैदिकसाहित्यस्य उपासनाकाण्डे आरण्यकोपनिषदौ भूयसा सामञ्जस्यं प्रकटयतः । वेदाः अपौरुषेयाः इत्यार्षमतं चेदपि उपनिषदः अर्वाचीनाः इति विद्वन्मतम् । तेषां तावत् प्राचीनत्वं न कल्प्यते । मुम्बै नगरस्य 'निर्णयसागरनामकेन' नाम मुद्रणालयेन विंशत्यधिकशतोपनिषदः मुद्रिताः । एकैकस्मिन्नपि आत्मज्ञानमेव प्रमुखविषयत्वेन स्वीक्रियते ।

कालान्तरेषु श्रीबुद्धात् परमपि उपनिषदः विरचयामासुः । प्रायेण सहस्राधिकोपनिषदः सन्तीतीर्यते बुधैः । तासु अष्टोत्तरशतमुपनिषदः प्राधान्यमर्हन्ति । तत्रापि शङ्करभाष्यसहिताः ईशकेनप्रश्नमुण्ड माण्डूक्य तैत्तिरीयैतरेयछान्दोग्यबृहदारण्यकेति दशोपनिषदः अनर्घाः निस्तुलाश्च भूरि प्रमुखतां यन्ति । नवीनोपनिषदस्तु आङ्गलेयाधिपत्यं यावद् विरचिताः इत्यत्र प्रमाणानि सन्ति । तत्र हि गद्यमय्यः उपनिषदः अतिप्राचीनाः तथा पद्यमय्यः अर्वाचीनाः इत्यपि निगद्यन्ते ।

बृहदारण्यकं, छान्दोग्यं, तैत्तिरीयम्, ऐतरेयम्, इत्याद्युपनिषदः गद्यरूपेण तथा ईशं, केन, कठ, मुण्डक, श्वेताश्वतराद्यः पद्यरूपेण च लिखिताः । बह्व्यः उपनिषदः नष्टप्रायाः। ऋषीणां चिन्तामण्डलस्य पारम्यतां प्रदर्शयन्ति उपनिषदः । वेदशाखानां गणनानुसारं भवन्ति उपनिषदामपि गणना ।

एकैकस्याः शाखायाः अपि एकैकोपनिषदस्तीति मुक्तिकोपनिषदि हनुमान् श्रीरामं निवेदयति । ऋग्वेदस्य एकविंशतिः शाखाः यजुर्वेदस्य नवोत्तरशतं, सामवेदस्य सहस्रं, अथर्वणः नवशाखाः च सन्ति । एकैकस्यापि वेदस्य मुख्याः उपनिषदः इत्थं भवन्ति –

**ऋग्वेदः**

ऐतरेयं, कौशीतकं, नादबिन्दुः, आत्मबोधः, निर्वाणं, मुद्गलं, अक्षमालिका, तृपुरतापिनी, सौभाग्यलक्ष्मीः, बह्वृचम् इत्याद्याः ।

**शुक्लयजुर्वेदः**

ईशावास्यं, बृहदारण्यकं, जाबालं, हंसं, परमहंसं, सुबलं, मान्त्रिकनिरालम्बं, त्रिशिखीमण्डलं, अद्वयतारकं, पैङ्गलं, भिक्षुकं, तुरीयातीतं, आध्यात्मं, तारसारं, याज्ञवल्क्यं, शाठ्यायनं, मुक्तिका ।

**कृष्णयजुर्वेदः**

कठं, तैत्तिरीयं, ब्रह्मं, कैवल्यं, श्वेताश्वतरं, गर्भं, नारायणं, अमृतबिन्दुः, अमृतनादः, कालाग्निरूपं, क्षुरिका, सर्वसारः, शुकरहस्यं, तेजोबिन्दुः, ध्यानबिन्दुः, ब्रह्मविद्या, योगतत्त्वं, दक्षिणामूर्तिः, स्कन्दं, शारीरकं, योगशिखा, एकाक्षरम्, अक्षि, अवधूतं, रुद्रहृदयं, योगकुण्डली, पञ्चब्रह्मं, प्राणाग्निहोत्रं, वराहं, कलिसन्तरणं, सरस्वतीरहस्यं च ।

## सामवेदम्

केनं, छान्दोग्यम्, आरुणिकं, मैत्रायणी, वासुदेवं, महोपनिषद्, संन्यासं, कुण्डिका, सावित्री, रुद्राक्षबालं, वज्रं, दर्शनं, जाण्डली च ।

## अथर्ववेदम्

प्रश्नः, मुण्डकं, माण्डूक्यम्, अथर्वशिरः, अथर्वशिखा, बृहज्जाबलं, नृसिंहतापनीयं, नारदपरिव्राजकं, सीता, शरभं, महानारायणं, रामरहस्यं, सामतापिनी, शाण्डिल्यं, परमहंसपरिव्राजकं, अन्नपूर्णं, सूर्यं, आत्मोपनिषद्, पाशुपतब्रह्मं, परब्रह्मं, देवी, भावना, भस्मजाबालं, गणपिमहाकाव्यं, गोपालतपनं, कृष्णं, हयग्रीवं, दत्तात्रेयं, गारुडम् च ।

दशोपनिषदः श्वेताश्वतरकौशीतिक्यावपि प्राधान्यमर्हतः । दशोपनिषत्सु ऐतरेयम् ऋग्वेदस्य ईशकठतैत्तिरीयबृहदारण्यकानि यजुर्वेदस्य एवमेव केनछान्दोग्यौ सामवेदस्य प्रश्नमुण्डकमाण्डूक्यानि अथर्ववेदस्य च उपनिषदः भवन्ति ।

## उपनिषद्शब्दार्थः

समीपार्थक उप, गाढार्थक 'नि' पूर्वक उपसर्गयोः 'सद्' धातोः निष्पन्नस्य उपनिषच्छब्दस्य अर्थसामान्यं निरूपयन् आचार्यवरः शङ्करः प्राह- उपशब्दो हि सामीप्यमाह। निशब्दश्च निश्चयार्थः । तस्मादैकात्म्यं निश्चितम् । सा विद्या सहेतुं संसारं सादयतीत्युपनिषद्शब्दस्यार्थः । मुमुक्षवः ज्ञानवितृष्णाः शिष्याः आचार्यसमीपमेत्य निश्चयेन निष्ठतया शीलयन्ति इति उपनिषद् शब्दस्यार्थः ।

अतिगूढस्यास्य उपनिषद्वाच्यस्य वेदान्तः, रहस्यविद्या , पराविद्या चेति नामान्तराणि वर्तन्ते । अनेकासु उपनिषत्सु उपनिषदिति पदप्रयोगः दरीदृश्यते । बृहदारण्यकोपनिषदि सत्यस्य 'सत्यमात्मा' इति वाक्यं उपनिषदेवेति प्रस्तावः दृश्यते । कठोपनिषदः भाष्यावतारिकायां शङ्कराचार्यः उपनिषच्छब्दस्य अर्थमेवं विवृणोति – "केन पुनरर्थयोगेन उपनिषद् शब्देन विद्या इत्युच्यते, ये मुमुक्षवः दृष्टानुश्राविकविषयवितृष्णाः सन्तः उपनिषच्छब्दवाच्यां वक्ष्यमाणलक्षणां विद्यां उपसद्य, उपगम्य तन्निष्ठया निश्चयेन शीलयन्ति, तेषामविद्यादेः संसारबीजस्य विशरणाद्, हिंसनाद् विनाशनाद् इत्यनेन अर्थयोगेन विद्या उपनिषदित्युच्यते"[9] इति ।

इहपरसुखाभ्यां विरक्ताः ये मुमुक्षवः लौकिकाज्ञान जीवनहेतुभूतबन्धनेभ्यः अविद्यां विद्यया प्रणाशयन्ति । इयमेव विद्या उपनिषच्छब्द वाच्या । अन्यमेकं सन्देहं परिमार्ष्टुं आचार्यः पुनरपि वक्ति –

"ननु च उपनिषच्छब्देन अध्येतारो ग्रन्थमपि अभिलपन्ति, उपनिषदमधीमहे, उपनिषदमध्यापयाम इति च नैष दोषः । अविद्यादिसंसारहेतु विशरणादेः सद्धात्वर्थस्य ग्रन्थमात्रे असम्भवात्, विद्यायां च सम्भवात् ग्रन्थस्यापि तादर्थ्येन त्वच्छब्दत्वोपपत्तेः 'आयुर्वै घृतमित्यादि'वत् तस्माद् विद्यायां मुख्ययावृत्या उपनिषच्छब्दो वर्तते ग्रन्थे तु भक्त्या इति । अस्य अयं संग्रहः यत् उपनिषच्छब्देन मुख्यतया विद्या निगम्यते" । तथापि ग्रन्थमित्यर्थोऽपि स्वीक्रियते ।

9 . Brhadaranyakopanishad(1.20)

अत्यन्तं गूढज्ञानं भवति ब्रह्मज्ञानम् । तस्माद् उप नि सद् इत्यादीनां विवक्षितार्थं त्यक्त्वा शङ्करप्रभृतयः महान्तः तस्य ब्रह्मज्ञानमित्यर्थं ददुः । सदेर्नाशनार्थोऽपि विद्यते इत्यतः उपसर्गसहितस्यास्य धातोः अविद्याप्रणाशिनी विद्या चेति अर्थान्तरमपि निरूप्यते । अस्यैव ब्रह्मप्राप्तिहेतुर्विद्या, भवतारिणी विद्या चेति नानार्थाः प्रकल्प्यन्ते । केवलं जिज्ञासवः शिष्याः एव अस्याध्ययनयोग्याः अधिकारिणः भवन्ति । विद्येयं साधारणजनेभ्यः अप्राप्या। न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः

अनन्यप्रोक्ते गतिरत्र नास्ति अणीयान् ह्यतर्क्यमणुप्रमाणात् [10]।। सामान्यबुद्धेरज्ञेयामात्मविद्येति यमः नचिकेतसे निवेदयति । कौशीतिक्युपनिषदि इन्द्रः प्रतर्दनं, छान्दोग्ये रैक्वः जानश्रुतिं, प्रश्नोपनिषदि पिप्पलादः सुकेशसत्यकामादीनेवं बृहदारण्यके याज्ञवल्क्यः जनकं च परीक्षितवन्तः येन तेषां जिज्ञासुत्वं सम्यगवबुद्ध्यैव तेभ्यः आत्मविद्यामुपादिशत् ।

...

…..✷♦✷……..

[10] Katha Upanishad(1.28)

षष्ठः अध्यायः

# उपनिषदां जीवितदर्शनानि

ईशावास्यमिदं सर्वंयत्किञ्च जगत्यां जगत्

तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्यस्विद्धनम् ।।

इत्यस्मिन् प्रथमे मन्त्रे एव ईशावास्योपनिषद् अत्यन्तं महत्वपूर्णमाशयं दर्शयति । अत्र हि जगतः समस्तजीवजालानामपि आत्मसत्ता एकैवेति स्पष्टीक्रियते । सर्वास्वपि उपनिषत्सु तत्थ्यमिदं सूच्यते चेदपि चराचराणामेकात्मतां अखण्डताञ्च अत्यन्तं सरलया रीत्या रुचिरं दर्शयतीयमुपनिषद् । सर्वेशं विस्मृत्य ये विषयासक्ताः चरन्ति ते नूनं दुःखमनुभवन्ति ।

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति।

सर्वभूतेषु चात्मानं ततो न विजुगुप्सते[11] ।।

अर्थात् सर्वप्राणिष्वपि परमात्मानं तथा परमात्मनि सर्वप्राणिनः अनुपश्येत् । आत्मा च सर्वव्यापी, प्रकाशमानः देहविहीनः नाशरहितः च । यः पुरुषः केवलं कर्ममग्नः तथैव यः कर्माणि परित्यज्य सततं देवताः उपासमानः अपि विनश्यति। सत्यं सदा प्रापञ्चिकविमोहैः पुरुषं मायापाशेन निबध्नाति । यथोच्यते-

[11]Isavasyopanishad-6

"हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखमि"ति । एवमेव प्राणत्यागे प्राणाः इन्द्रियाच वायौ विलीयेरन्, अन्तिमवेलासु अस्माभिः कृतानि सर्वकर्माणि स्मरेत्यपि स्मार्यतेऽयं श्लोकः ।-

वायुरनिलममृतमथेदं भस्मान्तं शरीरं
ॐ क्रतो स्मरकृतं स्मरकृतं क्रतो स्मरकृतं स्मर [12]।। इति ।

सनातनभारतीयदर्शनस्य सत्तां मनसि धारयतीयमुपनिषद् ।

केनोषितं पतति प्रेषितं मनः केन प्राणः प्रथमं प्रैति युक्तः
केनोषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवता युनक्ति [13]।।

इत्ययं केनोपनिषदः प्रथमो मन्त्रः एव नः गाढं चिन्तयति । कस्य वा प्रेरणया मनः विषयासक्तं भवति ? कस्य वा नियोगेन प्राणः विचलति ? कस्य देवस्य नियोगेन वाचः उद्गीर्णो भवन्ति ? कः देवः श्रोत्रे नेत्रे च नियुनक्ति ? इत्येषां समस्यानामुत्तरमेवं प्रयच्छति –

श्रोत्रस्य श्रोत्रं मनसो मनो यद्
वाचो ह वाचं स उ प्राणस्य प्राणः
चक्षुषश्च क्षुरतिमुच्य धीराः
प्रेत्यास्मादल्लोकादमृता भवन्ति ।।

[12] Ibid.17

[13]Kenopanishad(1.1)

मनोवाक्प्राणश्रोतृनेत्रादिरूपेण इदमेवात्मतत्त्वं सर्वतो समुल्लसति । तस्याभावे सर्वाणीन्द्रियाणि निरर्थानि । केवलोपाधिभूतानीन्द्रियाणि सार्थकानि करोति आत्मतत्त्वमिति अयं श्लोकः अस्मान् बोधयति । त्यक्तप्राणः शरीरः नः यत्किमपि न अवबोधयति । आत्मस्वरूपज्ञानेन अविद्यानाशनं सम्भवति । परब्रह्मणि मनो निधाय ब्रह्म स्मर सङ्कल्पयेत्यादिकं उपनिषदामदेशो भवति । तपः, इन्द्रियनिग्रहः, कर्म च ब्रह्मविद्यायाः पादाः, वेदाः अवयवाः सत्यं तस्य आयतनमिति च उपनिषद्वदति ।

तस्यै तपो दमः कर्मेतिप्रतिष्ठा
वेदाः सर्वाङ्गानि सत्यमायतनम् [14]।।

विशिष्टेयमुपनिषद् येनोपास्यते सः नूनं स्वर्गमवाप्नोति । एवमेव वेदान्तरहस्याणां नव्यानुभूतिर्भवति कठोपनिषद् । पितुरनुग्रहं तथा स्वर्ग्यमग्निश्चाधिकृत्य जिज्ञासवे नचिकेतसे यमः द्वयमपि प्रादाच्चेदपि किन्तु मृतिरहस्यं निवेदयितुं यमः वैमुख्यं प्रकटयति। दुष्प्रापान् सर्वान् भोगान्, सकलभोगापि वररूपेण दातुं यमदेवः सन्नद्धः आसीच्चेदपि नचिकेतः स्वयमुन्नीते प्रश्ने दृढमतिष्ठत् । परं दृढव्यवसायिने तस्मै बालाय यमः आत्मविद्यामुपदिदेश। अत्र अदृश्यं विकारैर्व्यवहितं रागादिसङ्कुले चित्ते व्यवस्थितं पुरुषं अध्यात्मयोगानुष्ठानेन साक्षात्कृत्य विवेकी कश्चन सुखदुःखातीतः परिणमते ।

[14] Ibid(2.8)

न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्

अजो नित्यः शाश्वतोयं पुराणो न हन्यते हन्यमाने शरीरे [15]।।

इत्यस्मात् उपनिषदंशात् जनिमृतिविहीनः आत्मा उत्पत्तिविनाशरहितः शाश्वतश्चेत्यवगम्यते । अणोरणीयान् महतो महीयान् आत्मा जीविनां हृदाकाशे वर्तते । पापी अशान्तश्च पुरुषः कदापि इमां वस्तुतां न विजानीते । अस्यामेवोपनिषदि रथशरीरयोः तुलनां करोति । यथा –

आत्मानं रथिनं विद्धि शरीरं रथमेव च

इन्द्रियाणि हयान्याहुर्विषयांस्तेषु गोचरान्

आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः[16] ।।

बुद्धिमन्तः पुरुषाः नित्यमिदं पीयूषं ज्ञात्वा अनित्यवस्तुषु कदापि न स्मरन्। जीविषु नानात्वं पश्यन्तः जननमरणात्मकसंसारे सततव्यापारिणः भवन्ति ।

उत्तिष्ठत जाग्रत प्राप्यवरान्निबोधत

क्षुरस्य धारा निशिता दुरत्यया

दुर्गं पथस्तत् कवयो वदन्ति [17]।।

[15]Katha Upanishad(2.18)

[16]. Ibid(3.3)

[17]Ibid(3.14)

इत्यादबोधनमपि अस्मिन्नेव दृश्यते । प्रारब्धकर्मणां फलानुसारं केचित् स्त्रीयोनिषु केचन अधोयोनिषु च जायन्ते । आत्मभूतस्य परब्रह्मणः गरिमामपि उपनिषदुद्घुष्यते । तस्यैव ब्रह्मणः इच्छानुसारं निखिलं प्रवर्तते । मरणात् पूर्वं यः आत्मानमवगच्छति सः संसारबन्धनेभ्यः विमुच्यते । आत्यन्तिकमोक्षमवाप्य परब्रह्मणि विलीयते च ।

अध्यात्मोपनिषदि हृदयगह्वरे वसन्तं आत्मनः शरीरं पृथिवी भवति सा पृथिवी तमत्मानं न जानातीत्यपि तथैव पृथ्व्यप्तेजोवाय्वाकाश मनोबुद्ध्यहङ्कारचित्ताव्यक्तप्रकृत्यादीनि आत्मनः आयतनश्चेदपि न कश्चिदपि आत्मानमवगच्छतीत्यपि अत्र कथयति।

ईश्वरविश्वासः सर्वैरप्यवश्यं कार्यं तच्च केनापि प्रकारेण कर्तुमर्हति एवं ईश्वरनामानि सर्वाणि ब्रह्मज्ञानं प्रयच्छतीत्यपि बह्वृचोपनिषद्वदति । एवमेव सत्यान्वेषिणां शिष्याणां प्रश्नान् निवर्तयति पिप्पलादमहर्षिः प्रश्नोपनिषदि ।

मुण्डके च परापरविद्याः कलासाहित्यराष्ट्रमीमांसार्थशास्त्रादिविषयाः सन्निबद्धाः । अनेकत्वे एकत्वं दर्शयतीयमुपनिषद् ।

जाग्रत्स्वप्नसुषुप्तेः ऋते तुरीयावस्थामपि बोधयति माण्डूक्योपनिषद् । 'अयमात्मा ब्रह्मे'ति महावाक्यद्वारा ईश्वरसंबन्ध दर्शयतीयमुपनिषद् । अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयकोशादीनां अन्तर्वर्तिनं आत्मांशं तत्साक्षात्कारञ्चाधिकृत्य तैत्तिरीयोपनिषदि प्रतिपाद्यते ।

आत्मस्वरूपमेवं प्रज्ञानं ब्रह्मेति ज्ञाप्यते ऐतरेयोपनिषद् । उद्दालकारुणीसंवादेन तत्त्वमसि इति वाक्यस्य गभीरतां प्रदर्शयति छान्दोग्योपनिषद् । भवसागरतारणमार्गः जीवनदुःखयोर्विवेचनेन केवलं सम्भवति एवं आत्मज्ञानेन दुःखनिवृत्तिः स्यादित्यपि अत्र प्रस्तूयते । आत्मज्ञानिनः जीवनं कथं स्यादित्यपि प्रबोधयतीयमुपनिषद् । भौतिकजीवनस्य न्यूनताः ससूक्ष्मं प्रपञ्चयत्यत्र ।

बृहदारण्यके तु 'अहं ब्रह्मास्मी'ति महावाक्यं सविस्तरं प्रतिपाद्यते । आत्मज्ञानसाध्याः अनेके मार्गाः आध्यात्मिकचिन्तासरण्यश्च अत्र अनावृतं भवति । अत्र हि ज्ञानी ऋषिः याज्ञवल्क्यः पत्न्यै मैत्रेय्यै ज्ञानोपदेशं प्रयच्छति । जनकगार्गीसंवादोपि इमां उपनिषदं अतिसम्पन्नं करोति । मनुष्यस्य दिव्यत्वं, आत्मब्रह्मैक्यस्य उद्घोषणं, सर्वव्यापी ब्रह्म इत्यादिकं सप्रपञ्चं प्रस्तूयतेत्र ।

त्यागेनैकेनेव ईश्वरसाक्षात्कारः भवति तथा च बाह्याभ्यन्तरशौचाभ्यां आत्मेन्द्रियसंयमेन हृदयात् तमोरजोगुणान् दुःखशोकादींश्च निवार्य नित्यशुद्धं चिदानन्दं यो मननं करोति सः कालान्तरेण परब्रह्मज्ञानेन परमे ब्रह्मणि विलीयते इति च कैवल्योपनिषदनुशास्ति[18]।

पुरुषस्य प्रारब्धकर्मणां प्रामुख्यं, शाश्वती शान्तिश्च ऐहिककर्मभ्यः एव अवाप्तुं शक्यते चेति अवधूतोपनिषद् वक्ति । स्थावरजङ्गमात्मकमयमेव प्रपञ्चं समष्ट्या परब्रह्मेति कथ्यते, यः इदं रहस्यं प्रत्यभिजानाति सः

[18] Kaivalyopanishad(5.6.7)

आत्यन्तिकमोक्षेण सहैव ब्रह्मणि विलीय तादात्म्यं भजते इत्यपि मान्त्रिकोपनिषद् कथयति ।

संसारबन्धहेतुमविद्यां निवार्य सकामं लोकान् ज्ञानस्वरूपं प्रति नयनस्य आवश्यकतां च बोधयति महावाक्योपनिषद् । धर्माधर्मविज्ञानं, प्रपञ्चस्य मिथ्यात्वं, संसारस्य सकलमपि तत्त्वं एकस्य अन्तरात्मन्येव द्रष्टुं शक्यते इत्यपि आत्मोपनिषदि प्रतिपाद्यते [19]।

जीवस्तु कर्मानुसारं जन्म लभते भूमौ । चण्डालादिसर्वमनुष्याणामपि शरीरं पञ्चभूतात्मकं आत्मा च एक एव । ब्राह्मणः जातिर्वा इति सन्देहाय समाधानमित्थं प्रदर्श्यते – मृगात् ऋश्यश्रृङ्गस्य कुशायाः कौशिकस्य जम्बुकात् जाम्बुकस्य वल्मीकात् वाल्मीकेः धीवरायाः व्यासस्य शशपुष्पाद् गौतमस्य उर्वश्याः वसिष्ठस्य कुम्भादगस्त्यस्य च सम्भवाद् जातिहीनाः ते प्रागेव ज्ञानिनः इति च ईर्यते । ब्राह्मणो नाम अद्वितीयः[20] जातिगुणक्रियारहितः सर्वदोषहीनः, सत्यज्ञानानन्दस्वरूपः, विकल्पहीनः, सकलकल्पाधारभूतः अन्तर्यामी, कामरागादिदोषविहीनः, शमदमादिसम्पन्नः, मदमात्सर्यादिविहीनश्च स्यादिति वज्रसूचिकोपनिषदि विव्रियते ।

[19] (2.22)

[20]Vajra Upanishad(1.9)

अक्ष्युपनिषदि संकृतिः शिष्येभ्यः ज्ञानप्राप्तिमात्रावेव जीवन्मुक्तिकारणं तत्त्वज्ञानमादिशति । तदेवं प्रकारेण – सन्मात्रचिन्तनेन यथासुखं जीव, इयमेवावस्था योगम् इत्युच्यते । योगग्रस्तः सन् कर्म यः करोति सः सत्कर्मव्यापृतो भवति । अज्ञानिनां कुवृत्तयः कदापि तं न बाधन्ते । भोगापेक्षां विना सः जीवति । यः सुष्टु भाषते, मनसा वाचा कर्मणा हितमेव करोति, शास्त्रज्ञानमार्जयति, तस्य दृष्टिः स्वच्छा भवति । स्वयं प्रबुद्ध्यते च ।

याज्ञवल्क्योपनिषदि जनकं प्रति याज्ञवल्क्यः रक्तमज्जामांस वसादिभिर्निर्मिते स्त्रीशरीरे किं वा सौन्दर्यमिति पृच्छति[21] । यतिः सर्वदा संयमी स्यात् इति च अनुशास्ति।

बाह्यशुद्धिरिव जपतप आदिभिरान्तरिकशुद्धिः कथं कार्यः, योगासनानि, प्राणायामवैशिष्ट्यं, आयुषः प्रवर्धनोपायाः, समाधिविषयाः, मिताहारप्रसक्तिः कर्णशिरोरोगाणां भगन्तरादीनां शमोपायश्च च प्रतिपाद्यते जाबालदर्शनोपनिषदि।

प्रणवमन्त्रस्य महत्त्वमधिकृत्य अमृतनाद्योपनिषद् अपि वदति । बन्धमोक्षयोः हेतुः मन एव इति वाक्यमपि सर्वविदितमेव । मन एव मनुष्याणां कारणं बन्धमोक्षयोः । प्रायश्चित्तस्य गुणाः, उत्तमगुरुणा कथं भवितव्यमिति च शाट्योपनिषदि प्रतिपादयति । एवं च मन्त्राणां रहस्यं ज्ञाप्तिं चाधिकृत्य दक्षिणामूर्त्युपनिषद्, कर्णौ शब्दस्य नासायां गन्धस्य च अप्राप्तये उपायाः

[21](12)

निर्दिश्यन्ते कुण्ठिकोपनिषदा । पितृयानं, देवयानं, शरीरस्य शक्तिप्रवाहाः, शरीराद् प्राणानां निस्सरणसरण्यः, प्रज्ञायाः स्थानं, च अवबोधयति कौशीतकीब्राह्मणोपनिषद् ।

राजयोगः, हठयोगः, योगस्य महत्त्वं, अभ्यासाः महासिद्धयः, खेचरीमुद्रा, सर्वव्याधिविनाशिन्यः मुद्राः इत्यादिविषयाः प्रस्तूयन्ते योगतत्त्वोपनिषदि । नवशक्तयः, त्र्यक्षरीविद्या,षडाधाराः, इत्यादिविचाराः क्रियन्ते सौभाग्यलक्ष्म्युपनिषदि । एवमेव मायां मायाशक्तीश्चाधिकृत्य सरस्वत्युपनिषद्, लिङ्गशरीरविषये शारीरकोपनिषद्, संन्याससस्य स्वरूपक्रमादिकं, नारदपरिव्राजकोपनिषद्, शरीरस्योद्भवः, देहवैविध्यं, जीवन्मुक्तिं चाधिकृत्य पैगलोपनिषच्च विवृणोति ।

योगासनान्यधिकृत्य योगचूडामण्युपनिषद्, सूर्योपसनाः सूर्योपनिषदि, मोहतारणोपायाः, सप्तविधमोहाः, संशयानां दुरीकरणोपायाः, प्रत्यक्षप्रपञ्चस्य कारणमित्यादयः विषयाः महोपनिषदि अन्तर्भवन्ति । कलिकालस्य पापापहनामानि, मोक्षस्य चत्वारि रूपाणि, च कलिसन्तरणोपनिषदि द्रष्टुं शक्यन्ते। उचितगर्भधारणमधिकृत्य गर्भोपनिषद्, शरीरस्य वायुचलनानि विव्रियन्ते त्रिशिखीब्राह्मणोपनिषदि । मनसः अस्थिरता, दशविधविघ्नाः पुरुषेण ज्ञातव्यानि वस्तुतत्वानि च ज्ञापयति योगकुण्डलिनीओ उपनिषद् । हृदयं, तदीयवैशिष्य्टानि च दर्शयति ब्रह्मविश्वोपनिषद् । शरीरान्तः आत्मनः स्थानं, आत्मनः बहिर्गमनमार्गांश्चाधिकृत्य सविस्तरं प्रतिपाद्यते सुबालोपनिषदि ।

……..✷♦✷……..

सप्तमः अध्यायः

# उपनिषदां अध्ययनसम्बन्धिनः सङ्कल्पाः

उपनिषदामध्ययनरीतिः नितरां भिद्यते आधुनिकवीक्षणैः । प्रापञ्चिकवस्तुषु केवलं श्रद्धां विधायताननुभोक्तुं धावद्भ्यः पुरुषेभ्यः लौकिकता नाम केवलं नश्वरा मायारूपा तस्याः तत्थ्यं अवगत्य आत्मावलोकनेन मायापाशं विहाय जीवनं सुन्दरं शाश्वतं च कर्तुं अस्मान् आदिशति उपनिषदः । विस्मयावहाः दृश्याः पश्येम वयमत्र ।

आभ्यः उपनिषद्भ्यः भारतीयाः ऋषिवर्यैः समाहृतानि दर्शनानि सनातनधर्मसंज्ञया प्रथन्ते । तस्य प्रामाण्यविषये सन्देहो नावशिष्येन। तन्नित्यमनन्तं च । सनातनधर्मं परिज्ञाय यः प्रवर्तते तदीयंकर्म अविनश्यद् तिष्ठति । उपनिषत्सु प्रपञ्चितं उन्नतविद्याभ्यासवीक्षणं जातिमतभेदं विना सर्वेष्वपि प्राणिषु एकत्वबोधं प्रयच्छति । यदि सर्वेषु आत्मतत्त्वमेकमेव तर्हि किमर्थं विवेचनं क्रियते एषां नाम्नि । केवलानुष्ठानानि वा संस्कारादयः वा मिथोप्रभेदाय अनर्हाः विषयाः खलु ।

जननमरणादयः, आयुषः परिमितिः, शैशवबाल्याद्यवस्थाश्च यदि सर्वेषु समानास्तर्हि अज्ञानावृतानि जातिमतविवेचनानि अनर्थानीति उपनिषदः अस्मान् बोधयति । आत्मनः पन्थाः सरलः भवति स च परमानन्दस्य मार्गः ।

सत्येन पन्था विततो देवयानः

एकं सद् विप्रा बहुधा वदन्ति[22] ।।

एकमेव सत्यं वयं बहुधा पश्येम । एकत्वबोधवान् पुरुषः कदापि न युद्ध्यते । राष्ट्रसम्पदः भूरिभागोƒपि धनराशिरस्माभिः युद्धसज्जीकरणाय नियुज्यते । अरिमर्दनाय सर्वदा सर्वथा सज्जाः वयम् । वस्तुतया कः कस्य वा रिपुः ? भूमौ जीवितुं सर्वेप्यर्हन्ति । पुनः किमर्थमियं शत्रुता ?

लोकस्य नानाप्रदेशेषुं रोगाः, दरिद्रता, अपमृत्यवः, अशान्तिश्च नृत्यति सति हि राष्ट्राणि परस्परं युद्धाय सिद्धतां प्रकटयन्ति । मनुष्यः स्वयमेव तस्य शत्रुः । जिज्ञासया यदि कश्चित् उपनिषदः उपगच्छति तर्हि सः लज्जया विनम्रः स्यात् । अधर्मेणार्जितं न किञ्चिदपि देहवियोगात्परं न रचति तच्च् न तमनुयाति । किन्तु तत्कृतापराधाः प्रारब्धकर्माणि च सर्वदा तेनैव सह स्युः। तानि मरणानन्तरमपि तं पुरुषमनुधावेयुः । एतत् सर्वमपि उपनिषदः अस्मान् बोधयन्ति ।

प्रतिनिमेषं सनातनधर्मस्य तात्त्विकांशाः विस्मर्यन्ते आधुनिकैः । भूयांसोःछात्राः अपि सुरालहर्यादीनां विपदां करालहस्तेषु विनिपातिताः । एषां पुरोवर्तिनोपि ततोप्यधिकतरं विनाशोन्मुखाः परिदृश्यन्ते । एतत्सर्वं

[22] . Mundakopanishad(3.1.6)

अविज्ञाय अथवा अदृष्टवत् नटित्वा अन्धाः इव तेषां पितरश्च । मानवानां विनयो नाम अतिविशिष्टः सः गुणः कुत्र गुप्तः। शिक्षणापचयस्य कारणानि अवश्यं परिज्ञेयानि भवन्ति अत्र ।

षड्दर्शनानां आधारोपि उपनिषदः एव । तद्वत् इतिहापुराणादयोपि एतेन सह तिष्ठति । रामायणस्य लक्ष्मणोपदेशे अगस्त्यस्तुतौ, भागवतस्य श्रुतिगीतायां भगवदुद्दवसंवादेषु हरिनामकीर्तनज्ञानपानादिषु च उपनिषत्प्रभावः दरीदृश्यते । ऐहिकं जीवनं उपनिषदः कदापि नावगणयति स्म । किञ्च तं श्रेष्ठं कर्तुं प्रायतन्ते । 'सत्यं वद धर्मं चर', 'सत्यान्न प्रमदितव्यं, धर्मान्न प्रमदितव्यं', 'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव' इत्यादिवाक्यानि सामाजिकजीवनस्य परमं धर्म दर्शयन्ति । सर्ववेदानामपि महावाक्यानामर्थं यदि सम्मेल्यते तर्हि सत्यस्य निर्वचनं सुगमं स्यात् ।

ऋग्वेदोपनिषदः ऐतरेयस्य महावाक्यं 'प्रज्ञानं ब्रह्म' इति भवति । सर्वज्ञं सर्वशक्तं ब्रह्म प्रज्ञानमथवा बोधसत्तैवेति अस्य अर्थः । यजुर्वेदीयोपनिषदः बृहदारण्यकस्य अहं ब्रह्मास्मीति महावाक्यस्य मयि स्फुरन्तां आत्मसत्ता (ब्रह्म) अहमेवेति ज्ञापयति । सामवेदीये उपनिषदि छान्दोग्ये तत्त्वमसीति यदा कथयति उपाधिविशिष्टः स जीवात्मा त्वं पदवाच्यः आत्मैव ब्रह्म इति च ईर्यते ।

एवमेव अथर्ववेदोपनिषदः माण्डूक्ये अयमात्मा ब्रह्मेति महावाक्यस्यायमर्थः – एषः आत्मा ब्रह्म एव अथवा अस्मासु व्याप्ता बोधसत्ता ब्रह्मैवेति । अर्थात् ईश्वरीयसत्तां अन्विष्यमाणेषु अस्मासु एव वयं तं ईश्वरं द्रष्टुं शक्यते न बहिः कुत्रापि इत्युक्त्वा अस्मान् विस्माययन्ति इमाः श्रुतयः। एतच्च कार्यं सदृष्टान्तं प्रतिपादयत्यपि ।

महावाक्यानामेकत्वसन्देशवदेव कृष्णमिश्रः 'प्रबोधचन्द्रोदया'ख्ये नाटके उपनिषद्देवी नामकं कथापात्रद्वारा इत्थं कथयति – "यस्मात् विश्वमुदेति , यत्र रमते तस्मिन् पुनर्लीयते, भासायास्य जगद्विभाति, सहजानन्ताजलं यन्महः शान्तं शाश्वतमाक्रियं त्यं अपुनर्भावाय यः दूतेश्वरं दयितध्वान्तमापास्य वर्त्तते नः प्रस्तुतं पुरुषम्" इति । अर्थात्- यस्मादिदं विश्वं समुद्भवति, यस्मिन् तिष्ठति, यस्मिन् च लीयते, यस्य भासा प्रकाशते, यच्च महः सहजानन्दप्रेरणया स्वयं ज्वलद् तिष्ठति, शश्वत्शान्तक्रियाशून्यं यं सुकृतिनः अपुनर्भवाय सर्वं विहाय प्राप्नुवन्ति तं पुरुषमीडे इति । एतदेव उपनिषदामपि लक्ष्यं । मानवानामाध्यात्मिकोद्धारणाय निस्वार्थसेवनं दीयते तत्र ।

यः आत्मानं सहजीविभ्यः पृथक् पश्यति तस्मादेव वीक्षणात् अद्यत्वे दृश्यमानाः निष्ठुरपातकाः, स्पर्धाश्च उद्भवन्ति । उद्बोधनैर्वा प्रभाषणैर्वा मनुष्याणां अज्ञानावरणं अनावृतं कर्तुं न शक्यते । अनन्ताः शास्त्रशाखाः विज्ञानपद्धत्यश्च यद्यपि पुरतो विलसन्ति तथापि याथार्थ्यस्य पथमस्मद् विदूरं गच्छति ।

यदा वयं नूतनशास्त्रसाङ्केतिकविद्यासु अविरतं निमग्नाः पौराणिकतायाः नाम्नि वयं उत्कृष्टज्ञानानि क्वचिद् कीलितं स्याद् । कालदेशादिवर्तिनः वैदिकसंस्काराः विशिष्य उपनिषद्संस्काराः सर्वधर्माणामपि अधिष्ठानभूतं उद्धृत्य आत्यन्तिकसत्यं प्रति तान् सर्वान् नयन्ति स्म ।

अद्य अनुभूयमानं सर्वमपि सुखदुखरोगादयः अस्माकमेव चिन्तानां वृत्तीनाञ्च परिणतफलानि भवन्ति । मरणात् त्रासं कञ्चिद् भयरहितं कर्तुं जीवेन जीवनेन च सह सम्बद्धस्य सर्वेषां कार्याणां कारणानां च प्रतिविधयः निर्देष्टुमपि समर्थाः भवन्ति उपनिषदः ।

दिशाबोधं विना अटद्भ्यः छात्रेभ्यः नवजीवनं शाश्वतदिशाबोधं च दर्शयितुं उपनिषदः प्रभवन्ति । वस्तुतया उपनिषदां अन्तर्वीक्षणं मिथ्याप्रपञ्चस्य सीम्नः विभेद्य सार्थकं जीवनं प्रदातुं पर्याप्तं भवति ।

पुरातनकालेन जीवनेन च सम्बद्धम् इति कारणेन मनुष्याणां उपनिषदः अधिकृत्य ज्ञातुं तत्परता नास्ति । सर्वदा वर्तमानकालाय वयं प्रामुख्यं दद्मः । परं वर्तमाननिमेष एव भूतरूपेण परिणमति । वर्तमानकालः भूतत्वेन परिवर्तते तर्हि तस्य वर्तमानस्य प्राधान्यं कथं अप्रसक्तं भवति । एवमेव केचन वर्तमानकालाः एव उपनिषत्सु निगूढं दृश्यन्ते । नैष्ठिकजीवनेन अर्पणमनोभावेन च तीक्ष्णानि सूक्ष्माणि जीवनलक्ष्याणि पुरस्कृत्य श्रद्धोपासनातपोभिः चिन्ताः ध्यानेन एकाग्रीकृत्य सत्यं साक्षात्कृतवदिनो ऋषिवर्यैः अनुभूतं सत्यमेव वयं उपनिषद्द्वारा विजानीमः ।

कृत्रिमोपग्रहाणां वानशास्त्रज्योतिषविमाननिर्माणानाञ्च विज्ञानानि यथा पौराणिकेभ्यः प्रादुर्भूतं तथैव मनुष्याणां आन्तरिकमण्डलं, लोकसम्बद्धं तस्य अस्तित्वसम्बद्धं च ज्ञानं तैः सह सम्बध्यन्ते । परन्तु जीवनं सुखकरं कर्तुं कर्मणामायासाय च मनुष्याः नूतनशास्त्रसाङ्केतिकताः समुद्पादयन्ति । तदानीमपि मानवानां आन्तरिकसत्तां प्रज्ञानं चाधिकृत्य याः उद्बोधयन्त्यस्मान् ताः परिज्ञातुं कोपि यत्नः न क्रियते मनुष्येण।

प्रपञ्चोत्पत्तिं प्रापञ्चिकवस्तूनि च यदा विशकलनं कुर्वाणः प्रपञ्चस्त्रष्टारमेव विस्मरन्ति । यस्यकस्यापि सृष्टेः कश्चन सृष्टिकर्ता भविष्यतीति वस्तुता विस्मृता । स एव सर्वसाक्षी ईश्वरः विस्मृतः इति कारणेनैव स्यात् एतावन्ति पापकर्माणि क्रियन्ते मनुष्येण।

उपनिषदः कदापि वैयक्तिकसमस्यानां उत्तरं न यच्छन्ति । अपि च ताः मनुष्याणां सामान्यतया वर्तमानसमस्यानां परिहाराय आध्यात्मिकसत्तां समन्वेत्य मार्गदर्शनं प्रयच्छन्ति । कदा मनुष्यः परम सत्यं प्रत्यभिजानाति तदासमस्तदुखान्यपि क्षयं यान्ति । पुरा छात्रै आचार्येभ्यः साक्षात् विज्ञानमार्जितमासीत् एतद्विषये।

अस्मासु प्रसुप्तां अनन्तशक्तिं क्रमशः उत्थाप्य तन्द्रामपहाय अन्ततः निसृतज्योतिष्प्रभावेण पुरतो गन्तुमपि उपनिषदः साहाय्यं कुर्वन्ति । किन्तु साम्प्रतं मृष्टान्नभोजिनः स्वार्थलुब्धान् चाध्यापकान् द्रष्टुं प्रभवामोवयमत्र।

क्षणेन वा ततोप्यधिकस्थ वा ध्यानेन तथा उत्कटेच्छया च भवति आधुनिकशास्त्रसाङ्केतिकविद्या एतावद्विकसमुपगता । इदमपि तस्य अन्तःस्थितशक्तेः प्रभावेणैव सम्पद्यते ।

बोधसत्तेति प्रथिते आध्यात्मिकसत्ये दृढं तिष्ठन्ति उपनिषदः । ईश्वरस्यास्तित्वं परीक्षणनिरीक्षणैः अवगन्तव्यमिति आधुनिकाः शाठ्यं कुर्वन्ति, परन्तु ईश्वरस्याभावे न किमपि कर्तुं शक्यते । मरणमिति अद्भुतप्रतिभासस्य पुरतः शास्त्रलोको सदा मौनमवलम्बते । अयं बोधः मनुष्यशरीरे कुत्र गुप्तः । कुत्र अन्तर्धानं करोति । शरीरस्य सर्वाण्यङ्गान्यपि मृतेः परंचापि तत्रैव वर्तमाने हि अङ्गानां चेतनादायिका काचिद् बोधशक्तिः शरीरे नासीदिति कः वक्तुं उद्यमते ?

उपनिषद्भिः उक्ताः कर्मसिद्धान्ताः भक्ति-योग-ज्ञान-कर्मक्षय सदाचारनिष्ठा-विश्वास प्रयोगविधयश्च किमस्मभ्यं न दद्युः ? कठोपनिषदः यमनचिकेतसंवादे बालस्य नचिकेतसा उत्कटेच्छया आत्मविद्या प्राप्ता । छान्दोग्यस्य आरुणीश्वेतकेतुसंवादतः केवलं वेदेतिहासपठनेन आत्मविद्या अप्राप्या भवति, तदर्थं शश्वद्वीक्षणं उत्तमः आचार्यश्चावश्यकः इत्यपि अवगम्यते। बृहदारण्यकोपनिषदः याज्ञवल्क्यमैत्रेयीसम्भाषणेन अवगम्यते यत् लिङ्गभेदं विना जिज्ञासुभ्यः आत्मविद्या स्वांशीकर्तुं शक्यते इति ।

स्वार्थताविद्वेषादि दुर्विकाराः अपनीय करुणा, सहजीविस्नेहः, लालित्यं च इत्यादयो महतीयगुणाः सम्पादनीया इति उपनिषदः उद्बोधयन्ति, उपनिषद्भिः । साङ्केतिकविद्यायाः साहाय्येन मानवमनश्शास्त्रपठनं, मस्तिष्कपठनमित्यादयः अनस्यूतं प्रचलन्तः सन्ति । तथापि मनसः अभौतिकघटना मस्तिष्कञ्च बोधसत्तायाः उपाधयः परं तत्वं तु ततो भिन्नम् इति उपनिषदः सयुक्तिकं उपस्थापयन्ति ।

मनः नाम चतुर्भिः वृत्तिभिः सहितः एकः पदार्थ इति उच्यते । ताश्च वृत्तयः भवन्ति – सङ्कल्पः, प्रकाशः, ज्ञानं, अभिमानं च । अथवा मनोबुद्ध्यहङ्कारचित्तानि । यथार्था बोधसत्ता आत्मैवेति च वदति । भौतिकतायां बाह्यप्रेरणासु निमग्नाय मनुष्याय निष्प्रभवीक्षणेभ्यः सुव्यक्तवीक्षणं प्रति नेतुं उपनिषदः एव केवलं समर्थाः । एषु इहपरलोके, प्रयत्नाराधनायुद्धशान्तिजीवनानि सर्वाण्यपि उपन्यस्तानि । एषां प्रादातारः तु ईश्वरमन्विष्य ईश्वरमार्गेण चलित्वा ईश्वरं साक्षात्कृतवन्तः ईश्वररूपिणः महर्षीश्वराः भवन्ति ।

एते जीवनस्य समस्तमेखलासु रताः प्रयत्नाराधनाशीलाश्च आसन् । प्रज्ञानां तेषां सन्देशाः केवलमनुष्याः वयं श्रृणुमः । तस्मादेव सः प्राकृतस्वभावः प्रदर्शयति । जीवने उन्नतिं प्राप्तुं अधः पतितुमपि सः शक्नोति । तस्य अज्ञानान्धकारं आत्मज्ञानप्रकाशेण अपनीय उत्तुङ्गश्रृङ्गं नेतुं प्रभवन्ति ज्ञानकिरणाः । कलाविष्काराय शास्त्रज्ञानसमार्जनाय सर्वस्मै अपि साहाय्यरूपेण स्थितैषा आत्मशक्तिः ।

……..✷♦✷……..

अष्टमः अध्यायः

# अद्यतनस्य विद्याभ्यासवीक्षणानि

ज्ञानसम्पादनमेव विद्याभ्यासलक्ष्यम् । परं तद् द्वारा यदि आर्जनीयं ज्ञानं सम्पादयितुं न शक्तं तर्हि तेनाध्यनेन न किमपि प्रयोजनं विद्यते तत्र । लोके विद्यमानागण्यविद्यासम्प्रदायेषु कश्चिद् यथेच्छं कमपि अध्ययनमार्गं स्वीकर्तुमर्हति । परमनया विद्यया सः सन्तुष्टजीवनं यापयितुं शक्नुयात् येन तस्य जीवनं सार्थकं स्यात् ।

वस्तुतयां विद्यार्जनेन कश्चित् चरितार्थः , सन्तुष्टः सन्तृप्तश्च भवेत् । प्रत्येकस्मिन् राष्ट्रे तत्तत् संस्कृतयः धर्मग्रन्थाः, शास्त्रविषयाः, तत्त्वशास्त्राणि च बहुधा दृश्यन्ते । किन्तु पूर्वोक्तलक्ष्याणां साधनं कथं कार्यं, जनिमृतिरहस्यमित्यादितत्त्वास्त्राणि बहूनि न विद्यन्ते। किञ्च भारतस्य महापैतृके एतत्सर्वं सुष्टु व्यवस्थापितमस्ति । भारतस्य वैदिकसाहित्यं तत्त्वशास्त्राणि च सकलविज्ञानानामपि भाण्डागारः अस्ति । कस्यचित् पुरुषस्य सार्थकजीवनं धर्मार्थकाममोक्षाधिष्ठितजीवनं भवेत् इति भारतीयसनातनधर्मं उच्चैरनुशास्ति । धर्मार्थकाममोक्षाः पुरुषार्थाः इत्युच्यन्ते । एतैर्विना यज्जीवनं याप्यते तत् केवलं निरर्थकमेव स्यात् । मोक्ष एव परमपुरुषार्थः आत्यन्तिकजीवनलक्ष्यं च ।

आधुनिकविद्याभ्यासव्यवस्थितिः धर्मस्य किमपि प्राधान्यं न कल्पयति। यदि कस्यचिद्राष्ट्रस्य शैक्षणिकव्यवस्था अधःपतति तर्हि तत् राष्ट्रमेव विनश्येत् । आत्मबोधाधिष्ठितपाठभागाः, धर्मार्थकाममोक्षाणां प्राधान्यप्रतिपादकानि कथाकाव्यजीवनदर्शनानि, आचारानुष्ठानानि, मूल्ययुक्तव्यावहारिकताश्च अनुदिनं ह्रासमुपगच्छन्ति पाठ्यविषयेषु । साम्प्रतं तु अध्यापकं विनापि अध्ययनसामग्रीणां साहाय्येन छात्राः स्वयमध्येतुं सामर्थ्यमवाप्ताः । तस्मादेव समीचीनासमीचीनताः प्रदर्श्य मार्गनिर्देशान् दातुं एकस्य मार्गनिर्देशकस्य अभावः दृश्यते तत्र तत्र आधुनिक विद्याभ्याससम्प्रदायेषु । ईश्वरप्रार्थना ससंध्यावन्दनादिषु -विषयेषु छात्राः अज्ञां विमुखाश्च समजायन्त ।

प्रथमकक्ष्यातः आरभ्यैव सर्वमेखलास्वपि विजिगीषुः कश्चित् छात्रः पितृणां अध्यापकानां च निर्देशेन मात्सर्यभावेन त्वरते । 'लोकाः समस्ताः सुखिनो भवन्तु' इति अधीताः संस्काराः आधुना विस्मृतिं यान्ति । नानो टेक्नोलजी प्रभृतयः अतिनूतनसाङ्केतिकविद्याः, विवरसाङ्केतिकविद्याश्च मानवान् प्रमत्तानकुर्वन् । सम्प्रति विद्यार्थिनं परितः पठनाय, अध्ययनाय, क्रीडनाय, चिकित्सायै च यन्त्रोपकरणानि सन्ति । एषां साधनसामग्रीणां साहाय्येनैव अनुनिमिषं तस्य विकासः वर्धते, सङ्गच्छते वर्धते, तथापि मनसः शक्तिः क्रमेण क्षीयते । धर्मकर्मफलादीनि किमिति ते न जानन्ति । बाह्यलोकमपि विस्मापयितुं समर्थः एकः आन्तरिकलोकः अस्मासु अस्तीति वा वास्तविकजीवनोद्देश्यानि वा कश्चिदपि न जानीते ।

यद्यपि नवीनतायाः लोके जर्जरितसूनद्रुमाः अवश्यं छेद्याः तथापि आधुनिकविद्याभ्याससम्प्रदायाः अस्माकं यथार्थसत्तां, विशिष्टां परम्परां, आचारानुष्ठानानि च निश्शेषमुत्पाटयन्ति । इतः बहिरागच्छन्तः नवपल्लवाः सहस्रविषयज्ञानिनः चेदपि ते दुश्शीलानुवर्तिनः, स्वार्थाः कुपुरुषाः जायन्ते । केवलं वित्तार्थिनां तेषां व्यावहारिकतल अत्यन्तं हीनं स्यात् । तादृशस्य कस्यचिद् ज्ञानेन सद्वृत्तयः कदापि नाङ्कुरिता भवेयुः ।

श्रेष्ठायास्मै मनुष्यजीवनाय प्रभावाकर्षकत्वधनैश्वर्याणि सम्पादयितुं सहायकानि जीवितमूल्यानि तस्य विनष्टानि । स्नेहत्यागदयादानविनयादयः उपचिन्वन्तीव प्रतिभान्ति समूहेऽस्मिन् । स हि निजपितृन् , सोदरान् च प्रति युद्धोत्सुकः समवर्तत । तस्याग्रतः पृष्ठतः उपरि वा अधः वा स एव वर्तते इति तस्य विचारः । तस्य  पराभवाय कोऽपि न प्रभवेत् । धनार्जनाय यत्किमपि कर्तुं सः यतते । तदर्थं नैजान् सर्वानपि वञ्चयितुमेव चिन्तयति च ।

जननात् प्रभृति मदमात्सर्यादीन् अन्तःशत्रून् मनसि धारयन्ति आधुनिकाः । स्वार्थः ईदृशः पुरुषः मातृपितृगुरुभक्तिहीनः ईश्वरं अनाद्रियमाणः जीवति । एषां समेषां वैकल्यहेतवः भिन्नाः स्युः । तथापि तस्य कारणेषु प्रमुखं कारणं आधुनिकविकलविद्याभ्यासरीतिरेवेति निश्चप्रचम् । शास्त्रसाङ्केतिकानां आर्जनेऽपि सः शान्त्यभावेन अत्यन्तं क्लिश्नाति । तदपि आधुनिक ज्ञानसम्पादनस्य वैकल्याद् जाता च्युतिरेव ।

पाठभागेषु महात्मनां जीवनदर्शनानि मानुषिकमूल्यप्रकाशकाः आध्यात्मिकांशाश्च संयोजनीयस्य अनिवार्यता अस्मिन् काले विवर्धते । उपनिषदः ईदृशानि सर्वविधविज्ञानानि प्रयच्छन्ति । यस्य आत्मज्ञानं नास्ति तादृशः पुरुषः जलोपरि प्लवमानकाष्ठमिव वृथा भ्रमति । केवलं बाह्यलोके लौकिकविषयेषु निमग्नः सः आन्तरिकसत्यानि किमपि न जानाति । बाह्यवीक्षणानि एव ऋतानीति सः मनुते । परं उपनिषत्सु सर्वत्र अस्माभिः ईदृशकार्याणि द्रष्टुं शक्यते ।

सत्यमेव जयति, असत्यं नैव विजयते । तस्मात् सत्यस्वरूपस्य ईश्वरस्य साक्षात्कारमार्गेऽपि सत्येन निर्मितं स्यात् । कदाचित् बाह्योपाधिभिः कदापि अस्माकं मनःशान्तिं संरक्षितुं न शक्येत । तदा च प्रश्नाः अन्वेषणानि च आन्तरिकचोदनां प्रति एव भवेयुः । तयैव चोदनया तस्य सर्वस्य उत्तरं दातुं शक्यते ।

अत्र जातिमतसाङ्गत्यं न वर्तत एव । हैन्दविकता नाम अहिंसात्मकमार्गद्वारा क्रियमाणसत्यान्वेषणमिति नेह्रुमहोदयस्य 'डिस्कवरि ओफ् इन्ड्या'[23] नामकग्रन्थे सूचितमस्ति । कस्यचित् प्रार्थना उपनिषत्कालिकानां जनानां चित्तशुद्धिं ज्ञापयति । यथा –

"असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मा अमृतं गमय" ।

[23]. Page.89

इतिवत्, अस्य अयमर्थः असतः मां सत् प्रति नयतु, अन्धकारात् मां प्रकाशं प्रति नयतु माॅ मृत्योः अमरत्वं नयतु इति प्रार्थना एकस्य विनयं, अभिवाञ्छां तथा परिज्ञानं च दर्शयति । भारतस्य विधिः छात्रवर्गैः द्वारा रूपान्तरं प्राप्नोतीति 1964-66 कालस्य 'कोत्तारि'नामकविद्याभ्याससमितिः अभिप्रैति । ततः पूर्वमपि 'मुतलियार्' कम्मिशन् प्रभृतयः बहवः समितयः आसन् । तथापि 'कोत्तारी'कम्मिशन् नामकसमित्या अनेके उत्तमांशाः तत्र तत्र विद्याभ्यासमेखलायां संयोजिताः । पश्चात् एन्. सि. इ. आर्. टि, नवोदया, यू. जि. सि, सर्वकलाशालाप्रभृतयः बहुविधसंस्थाः समारब्धाश्चेदपि अद्य शिक्षणमेखला परिक्षीणावस्थायां वर्तते ।

कस्यचिद्गृहस्य अङ्कणे ससन्तोषं दोलनं कुर्वन्नासीत् कश्चन वृद्धः । तदा कश्चन पथिकः आगत्य तं वृद्धमेवमपृच्छत् – अस्मिन् काले कस्यापि मुखे आह्लाद दर्शनं कृच्छ्रसाध्यम् । तथापि भवतः मुखे तु प्रमोदावेशः कथं प्रद्योतते। तच्छ्रुत्वा वृद्धः एवं प्रत्यवदत् – अहं प्रतिदिनं षड्वारं धूमपानं करोमि । त्रिकालं मांसं खादामि । व्यायामोऽपि नैव क्रियते । प्रतिवारं अत्यधिकं सुरां पिबामि । किञ्चिद् लहरीजनकमपि सेवे । इति । किन्तु एतद् अविश्वसनीयमिति वदन् सः पथिकः ततः प्रातिष्ठत । मार्गमध्ये एतदेव कार्यं मुहुर्मुहुः पर्यालोच्य सः वृद्धमुपगत्य पुनरपृच्छत् । भवतः किं वयः? वृद्धः षड्विंशतिः इत्यवोचत् ।

इयं काचिद् केवलघटना नास्ति । साम्प्रतं शिक्षणमेखला तथा छात्राश्च ईदृशीः महत्यः समस्याः अभिमुखीकुर्वन्ति । का वा शास्त्रसाङ्केतिकविद्याः इमाः समस्याः परिहरन्ति । नैव कोपि शक्यते अस्य अपचयनिवृत्तिं कर्तुम् । अस्य परिणामाय मानविकतायाः अवगमनयोग्या प्रज्ञा जनानां मनस्सु आनेतव्या ।

उपरिपठनाय यथाकालं इमे छात्राः यदागच्छन्ति तदा गवेषणयोग्याः जीवस्पर्शिनः विषयाः तेभ्यः दातव्यः शेधनिर्देशकेनाचार्येण। एतदर्थमपि वैदिकशिक्षणं, उपनिषद्विद्याभ्यासश्च अग्रिमां गणनामर्हति आनेतव्यमस्ति। गणित ज्योतिषायुर्वेद विमानशास्त्र जीवशास्त्र रसतन्त्र मनःशास्त्रादयःसहस्राधिकाः गवेषणयोग्याः विषयाः एषु अन्तर्भवन्ति । यतः अस्माकं पैतृकसम्पदियं शास्त्रपारम्पर्यं कदापि उपादेयं भवति । तदर्थं संस्कृतपठनं प्राथमिकश्रेणीतः एव समारभ्यते तर्हि अत्यन्तं समीचीनं स्यात् ।

नदीवनपर्वतादयः समानाः यावत्तिष्ठन्ति भूमौ कति सङ्कीर्णताः तत्र समुद्भवन्ति सततम् । अस्यां वेलायां स्थावरजङ्गमादिषु उपकरणेषु दत्तश्रद्धः पुरुषः आसु सङ्कीर्णतासु श्रद्धाविहीनः सन् अन्धवत् तिष्ठति । प्रकृतेः मेधावैभवं कियदिति वेदोपनिषदः अस्मान् निबोधयति ।

शाखामिश्रणं, सम्मिश्रसस्यानि इत्यादयः बहवः विषयाः पौराणिकालादारभ्यैव वेदशास्त्रेषु द्रष्टुं शक्यन्ते। किन्तु जातु अनस्तसूर्यदेशीयाः अस्माकं देशमागत्य अत्रत्यान् प्रज्ञाविहीनानकुर्वत । स्वामिनः विवेकानन्दस्य वचोवत् निषेधिनां मनुष्याणां समूहवत् अस्माकं समाजः पुनः पुनः परिणमते। अज्ञानिनः केवलविमर्शिनः भूरिजनाः यदि केवलज्ञानार्थिनः तर्हि अन्धकारावृतपथेषु विज्ञानरश्मिः पुनरपि ज्वलेत्।

प्रपञ्चसृष्टेः निदानं 'बिग् बाङ्' सिद्धान्तः अतिसरलया रीत्या नासदीयसूक्तेषु प्रतिपादितमस्ति । प्रपञ्चस्य कालगणनामपि ससूक्ष्मं वेदाः अङ्कनं कुर्वन्तीति महदाश्चर्यावहमेव । सत्यधर्मस्नेहाः ईश्वरस्य साक्षात्कारोपाधिनः इति उपनिषदः ज्ञापयन्त्यस्मान्। एषु मार्गेषु यदि जीवनं नयेत् तर्हि सुखं शान्तिश्च विनाप्रयत्नं लभेत । एतस्मै विद्याभ्यास एक एव उपायः । गृहात् समाजात् विद्यालेभ्यश्च सर्वस्यापि छात्रस्य यथायोग्यसौकर्याणि प्राप्तानि भवेयुः ।तदर्थं विद्याभ्यासः सत्ययुक्तं तदीयशालाश्च यथार्थप्रदर्शकाः च भवेयुः।

माता, पिता, पुत्रकलत्राणि चेति सर्वेfपि धर्मार्थं स्पर्धन्ते यन्निमित्तं स्पर्धते प्रतिनिमेषं तदा अनेन याथार्थीकरणं पुनर्जायेत। मनुष्यत्वं च तत्र प्रकटं स्यात् । तस्य प्रतिध्वनः अनुरणनाश्च प्रकाशपूर्णं भवेत् । यदि याथार्थ्यमिदं शिक्षणप्रक्रिया यां निहितं स्यात् तर्हि अत्र भौतिकात्मीयमिश्रणेव कुर्यात् पाठ्यविषयेषु।

पञ्चतन्त्रं, हितोपदेशः, खुरान् बैबिल्कथाः, रामायण महाभारत पुराणेतिहास कथाः, वेदवेदाङ्गसाराः सर्वमपि शास्त्रविषयैः सह पाठ्यभागेषु योजयित्वा प्राथमिकस्तरेभ्यः समारभ्यैव अध्यापयेत् । वैदेशिकानां शिक्षणनयाः अस्माभिः नानुवर्तनीयाः ।

अस्य भारतवृक्षस्य संवर्धनाय या शेमुषी, यद् वैभवं चावश्यकं तत्सर्वमत्रैव भारताम्बायाः अङ्के एवास्ति । इतरराष्ट्राणि लौकिकसम्पदः परमोच्चकोटिमवाप्यापि तद्देशीयेभ्यः आयुरारोग्यसुखशान्तयः कस्मान्न प्राप्नुवन्तीति चिन्तायां तत्परिहाररूपेण आर्षपारम्पर्यं इतः अल्पशः स्वांशीकर्तुं ते समारभन्त । परं तदापि भारतीयाः वयं वैदेशिकसंस्कारस्य अनुयायिनः तेषां विकलसंस्कारस्य अनुवर्तिनश्च भूत्वा एवमेव कालं यापयमः । अत्र वस्तुतया पुरोगमनं नाम विद्यालयेभ्यः प्रभृति समारंभणीयम् । अन्येषां सर्वेषामपि विकासानां आधारशिलापि एतदैव ।

प्रभूतं धनं व्ययीकृत्य विदेशान् वा अन्यान्तराणि वा गत्वा सर्वकलाशालाः निर्माय संवादचर्चाश्च सञ्चाल्य किमभिः सञ्जितम् प्रयोजनं? शिक्षणस्य दिशाभ्रंशं चक्षुष्मतः अपि अन्धवत् श्रोत्रियानपि बधिरवत् ज्ञानिनमपि अज्ञानिवत् विभावयति । ईश्वरीयतायाः जीवत्प्रतीकाः बहवः महात्मानः अस्माकं मार्गदर्शिनः आसन् । परमद्य तेषां संख्या शुष्यति ।

अत्युष्णे अतिशीतेषु अग्निपर्वतप्रदेशेषु अतिशैत्येषु पर्वतसानुषु निबिडवनान्तरेषु समुद्रतीरेषु च क्षुधार्ताः कति मानवाः निवसन्ति ? ते सर्वेऽपि समानाधिकारिणः अध्ययने जीवने च अस्याः पृथिव्याः केचनविभागाः केवलं रोगपीडिताः, बुभुक्षिताः, दीनाः निर्धनाश्च सन्तः जीवनाय नितरां क्लेशमनुभवन्ति इति सत्यमवश्यं अस्माभिः मनसि निधातव्यम् । श्वः वयमपि अस्माकं कर्मफलानुसारं तादृशाः भवितुमर्हन्तीति परिज्ञानं प्रदातुं केवलं इमाः उपनिषदः एव सक्षमाः। एतदवगन्तुं हृदयविशालता, जिज्ञासा, सत्यामाभिमुख्यं च अवश्यं भवेत् ।

अत्र कस्यापि मानवस्य उच्चनीचभावः नास्तीति उद्बोधनमेव क्रियते उपनिषद्भिः । वित्तेन वा स्थानस्य औन्नत्येन  वा यः कोऽपि स्वयं श्रेष्ठं मनुते चेत् तदपि शिक्षणस्य न्यूनता एव । कश्चिद् ज्ञानी कथं अपरं नीचवत् द्रष्टुं शक्नुयात् ? कदापि तस्य विकलचिन्तनानि न भवन्ति । तद्वत् परान् दूषयितुं वा प्रकुपितान् कर्तुमपि न शक्नोति ।  तादृशाः एव वस्तुतां शिक्षणसम्पन्नाः । सहिष्णुतां सहजीविस्नेहच उत्पादयितुं वक्रतां परित्यज्य आर्जवेण कार्याणि वीक्षणीयानि । तदर्थं मूल्यबोधशिक्षणमेव अपेक्षितम् ।

एवञ्च शिक्षानयकारेभ्यः तीक्ष्णनयनानि, चित्ताकर्षकस्वरमाधुर्यं, रूपसौन्दर्यं एतादिकमपि नावश्यकम् । परन्तु सामाजिकप्रतिबद्धता, मनोवैशाल्यम्, स्नेहपूरितचित्तमेव अपेक्षते । तेषां प्रज्ञा आलोकं दीप्यमानप्रभायुक्ता, सुतार्या, स्वच्छा, सूक्ष्मशालिनी च स्यात् ।

भारतस्य सर्वशक्तिकेन्द्रेषु जीवनाडीसम्मितप्रमुखप्रदेशेषु च उपनिषद्ध्वनयः उच्चैः आरवं कुर्वन्ति । सः रवः अत्रत्यं प्रति स्पन्दनेषु प्रतिफलतीति निस्तर्कमेव । परन्तु अद्य तावत् इमे ध्वनयः जडशरीरवत्, ललाटतिलकवत् सङ्कुच्य विचलन्तः निस्तेजस्कम् अस्तं गच्छन्ति ।

आप्तवाक्यत्वेन भारतसर्वकारः मुण्डकोपनिषदः 'सत्यमेव जयते'24 इति वाक्यं, परमोच्चन्यायालयेण 'यतो धर्मस्ततो जय' इति वाक्यं, पदातिसेनया 'सेवास्माकं धर्मः' इति, वायुसेनया 'नभः स्पृशं दीप्तं', इति जलसेनया 'शं नो वरुणः' इति25, दूरदर्शनेन 'सत्यं शिवं सुन्दरम्', आकाशवाण्या 'बहुजनहिताय बहुजनसुखाय', बि. एस्. एन्. एल्. संस्थया 'अहर्निशं सेवामहे' इत्याद्यनेकानि उपनिषद्वाक्यानि श्रुतिगीतोपनिषद्भ्यः चित्वा स्वीकृतानि ।

रुप्यकेषु अपि 'सत्यमेव जयते', इति मुद्रितं दृश्यते । 'विद्यया अमृतमश्नुते'[26] इति प्रायेण सर्वेषु शिक्षणकेन्द्रेषु आलिखितमस्ति । इतोप्यधिकं वाक्यानि प्रमुखप्रशासकसंस्थासु प्रचोदकरूपेण आलेखनीयानि भवन्ति ।

……..✷♦✷……..

[24] Mundakopanishad(3.1.6)

[25]Taittiriya Upanishad(1.1.1)

[26]Isavasyopanishad-11

नवमः अध्यायः

# आधुनिकविद्याभ्यासे उपनिषदां प्रामुख्यम् ।

जनानां शिक्षा मेधाशक्तिश्च राज्यविकासाय बाढं सहायिका भवति । तथा च एषा शिक्षणव्यवस्था आत्मीयताप्रसक्ता च भवेत् । एकदा अध्ययनं नाम सार्ववर्णिकं नासीत् । भक्तिः, आराधना आराधनालयाश्च यदा सर्वत्र व्याप्ताः तदा श्री नारायणगुरुदेवेन एवमुक्तं यदत्र शिक्षणशालाः एव अवश्यं आवश्यकाः इति ।

विनष्टप्रज्ञानां अज्ञानिनां सहवासात् भ्रान्तालयवत् परिणममाने अस्माकं देशे जनैः उदेधृतमस्तकैः यदि भाव्यं तर्हि विद्याभ्यासः अनिवार्यः इति स्वामिना विवेकानन्देनाप्युक्तमस्ति । केवलं षड्रूपकेभ्यः पितॄन् निजसोदरान् च शिररधे कर्तुं भारतादृते कुत्र वा लक्षाधिकाः जनाः सिद्धाः भवन्तीत्यपि तेन भणितमासीत् ।

जर्मन् देशीयानां तु बौद्धिकव्यापारः तथा कर्मनैरन्तर्यञ्च अभ्युन्नतहेतुरजायत । भारते रोगदारिद्र्यादयः विपदः यदि सन्ति तर्हि तदत्रत्य शैक्षणिकापचयेनैव भवितुमर्हति। निशिता श्रद्धा छात्राणां नास्तीत्यपि अस्मादेव कारणात् जातम् । सर्वाभिरपि उपनिषद्भिः श्रद्धा भूयो भूयः विचार्यते ।

तासामुपनिषदां प्राथमिकपाठाः साधनचतुष्टयसम्पत्तिरेव । आत्मनात्मविवेकः, सत्यासत्यविवेचनं, इहामुत्रफलभोगविरागः, शमादिषट्क - सम्पत्तिः, मुमुक्षुत्वं इत्याद्याः भवन्ति ते विचाराः । अत्र शमादिषट्के शमदमोपरतितितिक्षाश्रद्धासमाधानानि अन्तर्भवन्ति । बाह्यविषयेभ्यः इन्द्रियनिवृत्तिरेव शमः । अयं च यमनियमादिसाधनैः सत्सङ्गत्याविचारैश्च सिद्ध्यति ।

मनसः विषयविरागता एव दमो नाम । उपर्युक्तैः साधनैः दमः सिद्ध्येत। तितिक्षा नाम वैरुद्ध्यक्लेशेषु सहनशीलं भवति । अर्थात् सुखशान्तिसमाधानानि अस्माकं कर्मफलेन प्राप्यते । तैः सह इतरदुःखान्यपि समानमनस्कतया स्वीकर्तुमस्माकं शक्तिर्वर्तेत ।

क्लेशेऽपि परपुरुषं तत्रादूषयन् सर्वं स्वस्य प्रारब्धकर्मणः फलमिति विचिन्त्य तृप्तोऽभवदिति अनुशास्ति उपनिषत्सञ्चयः । तच्च आसां महद्वीक्षणेषु अन्यतमं भवति । अद्यतनछात्राः किं वा सहन्ते ? लघुकार्याय अपि सः अपरं दूषयति । तस्य स्वार्थयतया एव सः तन्न सहते । एवमेव यस्यां कस्यामपि स्पर्धायां यावद् विजयं न प्राप्नोति, कस्यापि सुन्दरवस्तुनः यदि भङ्गो जायेत तर्हि तत्किमपि सोढुं तस्य मनः तं न प्रेरयति कदापि । तस्मादेव जीवनस्य निम्नोन्नतेषु तस्य विभ्रान्तिः जायते । उत्तमविद्याभ्यासस्य न्यूनताः वयमत्र पश्यामः ।

क्षोभरहितेमनसे नित्यं तितिक्षायाः अभ्यासः आवश्यको वर्तते । क्षोभेण बहवः अधमविकाराः मनसि आयान्ति एवं आन्तरिकसुव्यवस्थाः व्यतिचलन्ति च । मातृपितृगुरून् प्रति छात्राणां क्रोधावेशोऽपि एतेन जायते । प्रथमसरण्यां शमदमयोः अभ्यासेनैव केवलं तितिक्षायाः अभ्यासोऽपि सुसाधः । एतेषां त्रयाणां अभ्यासेन चतुर्थी उपरतिः  क्लेशं विना लभ्यते । इन्द्रियाणां विषयेष्वनासक्तिः , विकाराणां अदास्यत्वमेवैतत् । सर्वा अपि वृत्तयः यथाकालं कर्तव्याः । एवं सति बाह्यव्यवस्थाः सुगमा भवेयुः तर्हि आन्तरिकव्यवस्थाः अवश्यं व्यवस्थिताः भवेयुः ।

षड्वयस्कः बालः नवतिवयोमितः वृद्धोऽपि तिमिरबाधिताः इव आन्ध्येन स्वेषां विकारशमनाय विद्याभ्यासस्य विकलफलं स्वीकुर्वन्ति । तैः प्रदर्शितायुक्तयः स्वयंकृतापराधान् न्यायीकुर्वन्ति । अत्र किं कार्यं किमकार्यं, किं सत्यं, किमसत्यं , को धर्मः, कश्चाधर्म इत्यादिकं मिद्या ते न जानन्ति । अत एव एतत्सर्वं सम्भवति । पौराणिकेषु शिक्षणसम्प्रदायेषु विषयाणां चयनं, शास्त्राध्ययनं, शिक्षणमातृका, कालपरिमितिः च सम्यक् निश्चीयते स्म । तेनैव विनयस्नेहैक्यत्यागार्पणबुद्धिविशावासादयो गुणाः सर्वेषु दृश्या आसन् । सर्वोपरि तत्कालिकानां जनानां मनसि शान्तिः समाधानं चासीत् । ये उपरतिसिद्धाः तैः एतत्सर्वमपि अनायासं प्राप्यते ।

मनसः प्रापञ्चिकवस्तुषु विश्वासः श्रद्धा नाम । एवं तर्हि इदानीन्तनकाले कति छात्राः श्रद्धावन्तः सन्ति । यदि कश्चित् पूर्वोक्तप्रकारं क्रमागतशिक्षणअलभत तस्य अन्तरात्मनि प्रवहन्ती शक्तिः क्रमेण साक्षात्क्रियते तद, द्वारा तस्य अस्तित्वं पूर्णतामेति । सर्वविषयकं ज्ञानमपि ज्ञानमेव । एवं यो यथार्थविद्यामधीते, स एव शिक्षित सक्रम एव विद्याभ्यासो नाम । परमद्य छात्रा भौतिकज्ञानमेव लभन्ते । निर्मातारं विस्मृत्य निर्मितिमेव केवलं ज्ञात्वा ग्रन्थकर्तारमविज्ञाय ग्रन्थमेव जानन्तः अभवन् अद्यतनविद्यार्थिनः ।

यथार्थज्ञानं प्रयोगपथमानेतुं निस्वार्थसेवनं, तथैव अध्यापकेभ्यः शिक्षकप्रशिक्षणं, मार्गनिर्देशाश्च समीचीनरीत्या दातव्या भवन्ति । पाठ्यपद्धतिरपि सुष्ठु परिष्करणीया । इतरपाठभागैः सह अस्माकं पैतृकविज्ञानमपि तत्र सन्निवेशितुं भवेत् । नो चेद् विकलविद्याभ्याससरणिः विद्यार्थिसमूहश्च जायेत । दिशाबोधविहीनाः विद्यार्थिनः जीवनमूल्यैर्विना प्रमदचित्ताः भवेयुः । असूया, विद्वेषः, जुगुप्सा, अधममूल्यानि प्रयोक्तृषु एव विनाशमापादयन्तीति उपनिषद्पाठाः मनसि निधाय, प्रज्ञेषु यथार्हादरं प्रदाय तेषां ज्ञानं विनियोज्य राष्ट्रजातिवर्गाभेदेन सद्विचारेण सह पाठ्यपद्धतिं सज्जीकृत्य निस्स्वार्थं पाठयितुं पठितुमपि अवकाशं प्रदायै न शिक्षणप्रक्रिया प्रसरणीभाम् ।

ज्ञानवृद्धाः आधुनिकैः नाद्रियन्ते यत्र तेषां धैषणिकताः श्लाघ्याः । सर्वेषु धर्मेषु अपि सन्मार्गाः एव अवधारणीयाविषयाः । ऋग्वेदे उक्तवत् "एकं सद्विप्राः बहुधा वदन्ति" इतिवत् एकमेव सत्यं ज्ञानिनः बहुधा वदन्ति । स्वार्थचिन्तां मात्सर्यभावं च त्यक्त्वा केवलसत्यं यदि निरूप्यते सर्वे धर्माः मार्गाः विभिन्नाश्चेदपि एकत्र समागच्छति ।

मात्सर्येण किं वयं अवाप्नुमः ? किञ्चिद् कालानन्तरं जडत्वमेती देहः । सविवेकवसमीपनं इतोऽपि आह्लाददायी भवेत् । बुभुक्षिताय किञ्चिद्भोजनम् , अज्ञाय ईषद् ज्ञानं, रुग्णेभ्यः किञ्चिद् सान्त्वनम्, दुःखितस्य समाश्वासनाय ईषद्हासः आसु एवं प्रदाने का वास्माकं हानिः किं नष्टम् । अहङ्कारः वस्तुतः कं सूचयति ? उपनिषदः अस्मान् आर्जवस्य परमां काष्ठां प्रदर्शयन्ति । आधुनिकाः विद्यार्थिनः विनयं इति पदमपि न विजानन्ति । लौकिकतामनुगच्छन्तो वयं अन्ते केवलं आधिव्याध्यसन्तुष्टीः लभामहे ।

छान्दोग्योपनिषदः षष्ठाध्याये भोज्यविषये आहारस्य महत्त्वं चाधिकृत्य विशेषेण आख्यातमस्ति । भुक्तं भोजनं शरीरान्तर्भागे त्रिधा विभज्यते । तेषु स्थूलांशः पुरीषरूपेण मध्यमांशः मांसरूपेण सूक्ष्मांशः मनोरूपेणापि परिवर्तते। अस्मात् उत्तममनसः रूपीकरणाय उत्तमाहाराः सेव्याः इत्यवगच्छन्ति । उत्तमाहारो नाम पूतं, पूतिरहितं, सात्विकं च स्यात् । एकस्य व्यक्तेः निर्माणं

तेनाहरितान्नाद् जायते इति उपनिषदः दृष्टान्तसहितं प्रमाणीक्रियते । किन्तु अद्य अस्माकं भोजनरीतिः अवाच्यं भीतिविधायकं च वर्तते । अपद्रव्यमिश्रिताहारिणः वयं तन्मध्ये जायमानान्तरिकपरिवर्तनानि नावगच्छन्ति ।

पेयाद्रव्याणां विषयेऽपि त्रिविधं विभजनं क्रियते । स्थूलांशः मूत्ररूपेण मध्यमांशः रक्तरूपेण सूक्ष्मांशः प्राणरूपेण च विपरिणम्यते । अर्थात् शरीरस्य प्राणसंस्थितिः पीतजलमाश्रित्य तिष्ठति । अत एव वारिणः जीविषु अतिमहत् स्थानमस्ति । द्रावकेषु जलमेव अधिकं स्यात् । साम्प्रतं जनैः कोक्कोकोला प्रभृतयः शीतजलानां उपयोगः क्रियते। एषां गुणनिर्णयाय कोऽपि न उत्सहते ।

अस्माभिः भुज्यमानघृतादि स्निग्धाहाराः अपि त्रिविधं विभक्ताः । तत्र स्थूलांशः अस्थिना परिवर्त्यते । मध्यमांशः मज्जया, सूक्ष्मांशः वचोरूपेण च विवर्तते । स्नेहघृतादयः यदि भक्ष्यन्ते तर्हि अस्माकं वचोऽपि स्निग्धं मधुरं स्पष्टं च भवेत् इति यदा उपनिषदः वदन्ति एकैकरोगाणां नामान्युक्त्वा वयं तानि शनैः परित्यक्तुं प्रयतामहे । एषां प्रभावेण वा वस्तुतया व्याधयः जायन्ते इति निरूपयितुमपि न यतन्ते । मनः अन्नमयः प्राणः जलमयः, वाक् तेजोमयश्च भवति इति आरुणिर्नाम आचार्यः शिष्याय श्वेतकेतवे आदिदेश ।

मांसाहारमपि कतिपयसन्दर्भेषु परिपोषयन्ति उपनिषदः । सर्वोपरि एकस्मै हितं मितं तुष्टिदायकं च यद्भोजनं रोचते तदेव अद्यात् । इत्युक्त्वे सत्वगुणप्रधानमाहारमेव सेवेत । अम्ललवणकट्वादियुक्ताः आहाराः राजसाः । यातयामाः पूतियुक्ताश्च आहाराः तामसाः । अनुत्साहः, निद्रातन्द्रादिदोषाः च एतेन जायन्ते । बृहदारण्यकोपनिषदि षष्ठाध्याये कुत्रचित् मांसाहारविधिमधिकृत्य वदति[27] । श्रेष्ठं यशस्विनं, मधुरभाषिणं च पुत्रं जनयितुं घृतेन सह मांसः विपच्य दम्पती खादेताम् । अत्र मांसं वृषभस्य भवितुमर्हतीति विधीयते ।

स्वामी विवेकानन्दः स्वस्य गुरुः सस्यभुग् आसीत् इति वदति । परन्तु देव्यै निवेदितमांसं तस्मै दीयते तर्हि शिरस्तावद् तदुन्नयति स्म । हिंसा पापमेव तथापि रसायनशास्त्रस्य विकासेन सस्याहारं यावत् मनुष्यशरीराय न रोचते तावत् मांसं सेवितुं शक्यते इति सः कथयति ।

अस्मिन् काले राजकीयवातावरणे यदा जीवामः तदा मांसभोजनं अनिवार्यमिति च सः वदति । यः अहर्निशं कठिन कर्मकारी भवति तादृशं सस्याहारं भोक्तुं नैव प्रेरयेत् । ये उपजीवकर्मणा विना कथञ्चिद् भुञ्जते तादृशाः मासं त्यजन्तु इत्यपि सः अभिप्रैति ।

........✷♦✷........

[27] Isavasyopanishad-11

दशमः अध्यायः

# कतिपयशैक्षणिकवीक्षणानि

शिक्षणं नाम इच्छाशक्तेः गतेः आविष्करणं नियन्त्रयितुं सफलीकर्तुं चास्ति । तन्न केवलं पुस्तकविद्येत्यपि स्वामिना विवेकानन्देनोक्तमस्ति । आधुनिकविद्यार्थिसमूहाय इच्छाशक्तिर्विनष्टा । पुनः कथं क्रियाशक्तिः ज्ञानशक्तिश्च भवति ? इदानीन्तु भारतीयाः विदेशं गत्वा तेषां प्रणाल्यः अवगम्य तद्वत् अस्माकं देशेषु अपि आनेतुं प्रयतन्ते । सङ्गणकयन्त्रस्य पवर्पोयिन्ट् नामकसंविधाने कक्ष्याणां विशेषाः छात्राणां वेषभूषाव्यवहारादयः प्रदर्श्यते । तदानीमेव तादृशाः कक्ष्याः श्रेष्ठाः पाठ्यपद्धतयः पठनसामग्र्यश्च रूपवत्कुर्वन्ति । अध्येतारस्तु एकवारमपि भोक्तुं क्लिश्नन्तः भवन्ति ।

विद्याभ्यासेन सह यत्किमपि कर्म कर्तुं निर्बद्धाः सन्तः कक्ष्यासु सर्वासु उपस्थातुमपि अशक्ताः कतिपयेछात्राः । अत्रापि छात्राणां वर्गीकरणं पुनरपि न खलु नवीकुर्वन्त्येते । अध्यापनसामग्र्यः पठनोपकरणानि च निर्मातुं परिष्कर्तुं साम्प्रदायिकविद्याः सम्पूर्णतया त्यक्तुमपि व्यग्रता भारतीयैर्विना के प्रदर्शयन्ति? विकसनोन्मुखपथे राज्यं यदा अग्रे सरति तदा अस्यां परिणामदशायामपि समूलोत्पाटिताः कियन्तः स्युः ?

अत्रापि क्रमिकसमन्वयेन एकमध्वरं स्वीकर्तुं उत्पतिष्णुम्मन्याः न शक्नुवन्ति । अधीशत्वदुर्मोहः, धनलोभश्च स्यात् अस्य पृष्टतः विद्यमानाशक्तिः । पाश्चात्यान् अनुसरन्तः वयं कस्मात् अन्यान् अनुकर्तुं अवसरं न दद्मः । उत वयं परैः अनुकर्तुं अयोग्याः इति स्वयं मन्यन्ते । किन्तु वयमस्माकं वेदोपनिषत्पुराणशास्त्रादयः प्राचीनाः आर्यग्रन्थाः विदेशीयैः अध्ययनविधेयाः कुर्वन्ति इति सत्यं न वयमभिजानीमः ।

सङ्कुचितचित्ताः अस्माकं विद्यार्थिसमूहः धिषणाशालिनः परिवर्तनाधीनाः च सञ्जायन्ते तदा च धनमानादिकाङ्क्षिणाः स्पर्धोत्सुकाः जनाः पृच्छेयुः यत् किमर्थं वाचनं किमर्थं पुनर्वाचनमिति च । शास्त्रसाङ्केतिकताभिः छात्राः अनुनिमिषं ज्ञानं सम्पादयन्तीति वाचः । किन्तु तेषां व्यवहारः कथं, तेषां मात्सर्यं किमर्थं, एकस्मै जीवाय तेन किं मूल्यं कल्पितम्, इत्यादिकं केन प्रत्यभिज्ञायते ? कस्य वा समयः एतदर्थं ?प्रभूतधनं विना जीवित मूल्यं किमस्ति अस्माकं छात्रेभ्यः । अस्माकं परवर्तिभ्यः पुत्रपौत्रेभ्यः किं संरक्षितं तैः । आत्मज्ञानहीनं किं वा विस्फोटनमत्र सम्भवति । पृथिव्याः क्लेशाः अपश्यन्तः अन्यग्रहेषु गच्छन्ति मानवाः । किन्तु इतः परं अन्यः बुद्धः वा श्रीशङ्करः वा विवेकानन्दो वा न कदापि जायेत ।

मनसि स्नेहयुक्तपुण्यकर्माणि वीक्षितुं आधुनिकज्ञानवृद्धाः अपि न शक्नुवन्ति । आत्मत्याग इति वस्तुता निजकुटुम्बोपरि अपि न प्रदर्शयति । प्रतिबद्धताः सर्वेषामपि सन्ति चेदपि तदर्थं कस्यापि समयः नास्त्येव । हत्याभिः

ते परिवर्तिताः । स्वस्य पितरं मातरं भ्रातरं च व्यापादयन्ति अस्मान्परितो विद्यमाना आधुनिकाः । अत्र कस्यापि कस्मिन्नपि स्नेहेऽपि नास्ति प्रतिबद्धतापि नास्ति ।

नवजातशिशवे अपि जङ्गमदूरवाण्याः उपयोगस्य परिशीलनं दीयते । प्रथमस्तराद् आरभ्यैव विद्याभ्यासः शुष्यति । विद्या आभासः भवति पुनः । गृहं प्राप्य कौटिम्बिकैः सह सम्भाषणं कर्तुं तस्य समयः न भवति । अवश्यकार्याणां निर्वहणायापि तस्य समयः न भवति । सर्वस्यापि प्रतिविधयः सन्ति । पितरोऽपि एवमेव । सर्वेऽपि मानसिकताया दूरं गच्छन्ति । अत्र व्यक्तिजीवनेन सह समाजस्य पतनं सम्भवति । बहूनि सौकर्याणि सन्ति चेदपि  तस्य पुरतः समस्याः कदापि न उपरतिं प्राप्नुवन्ति । परिणयस्य दिने एव विवाहोच्छेदः सम्भवति । क्रियमाणकर्मणां अर्थाः एक एव लक्ष्यः । तस्य पुरतः धर्माः, क्षुधा, अश्रूणि च निष्प्रभं नैष्फल्यमुपगच्छन्ति ।

किमर्थमिदं शिक्षणम् । कृषिमत्स्यबन्धनमित्यादिभिः यदि जीवति तर्हि कियत् शान्तिः प्राप्नोति । शास्त्रसाङ्केतिकतायाः गुणांशान् उद्घोषयन्तः ततोऽप्यधिकं तस्य दोषाः सन्ति तेन जीवनमेव विनष्टाः बहवः सन्तीति वा तादृशाघातानां निवृत्तये किं कार्यमित्यपि न विचिन्तयन्ति ते । सहजीविस्नेहं विना उन्नतविद्याभ्यासस्य किं गौरवम् । मालिन्येनैव मालिन्यं निष्कासयति ।

पितृभिर्निर्दिष्टेमार्गे एव चरेयुः छात्राः । मूल्यरहितशिक्षणम् । छात्राः अधार्मिकरूपाणि एव केवलं श्रृण्वन्ति, पश्यन्ति, जानन्ति च । यन्त्रवत् परिवर्तते छात्रसमूहः । अत्र चिन्ताः, विचाराः, वृत्तयः, जीवनाहाराः इति सर्वमपि दूषितमेव। शास्त्रनामकफेनकेन प्रक्षाल्यते चेदपि कदापि मनुष्यजीवनं स्वच्छं न भवति । एतेन सह प्रतिस्पर्धितुं वरेण्याः गुरुवर्याः प्रज्ञाशालिनश्च एकत्र सन्ति तथापि तेषां समेषां दिशाभ्रंशः सञ्जातः । नूतनसाङ्केतिकताभिः, चेतोहरवर्णमिश्रणैः वा विरच्यमानस्य भारतस्य चित्रं कदापि सुन्दरं न भवति । सुन्दरं तन्मुखं विकृतमभवत् । समीचीनशिक्षणेनैव तत् परिवर्तयितुं शक्यते ।

भारतीयतत्त्वज्ञानस्य मौलिकार्जवः, सौन्दर्यं, संशुद्धिश्च उपनिषद्सु सम्मिलिताः। श्रुतीनां काठिन्यमनुपश्यन्ति तत्र सामान्याः । किन्तु भारतीयतत्त्वज्ञानवृक्षे उपनिषदपेक्षया सुन्दरकुसुमं नास्तीति 'डोस्सण्'महोदयेनोक्तमस्ति ।

……..✷♦✷……..

एकादशः अध्यायः

# शिक्षणस्य समकालिकवीक्षणानि

शास्त्रसाङ्केतिकविद्याविकासाः हितकरा एव । परं सृष्टेः अधिकः तत् संहारो न क्रियेतेति पर्यालोचनीयो विषयः । सर्वाण्यपि परीक्षणनिरीक्षणानि धैषणिकतायाः विस्फोटनान्येव । अवश्यं तत्र मनसः ध्यानात्मकता मेधाविकासः, अन्तर्दर्शनं, इच्छाशक्तिश्चापेक्षिताः ।

कस्मिन्नपि तस्य शक्तिचैतन्यस्य बहिस्फुरणं द्रष्टुं शक्यते । परं तस्य पृष्टतः केवलतायाः स्वार्थतायाः अज्ञतायाश्च चेतोविकारः निगूढा वर्त्तन्ते । स एव सर्वासां समस्यानामपि मूलकारणम् । तत्र किञ्चिद् ज्ञानमपि तेन सह भवेत् तर्हि भूरि कल्याणकरि भवेत् ।

ज्ञानस्य उच्चकोटिं यदा वयं प्राप्नुमः तदा स्वार्थविकाराः, मात्सर्यं, भौतिकलाभाः  इत्यादिकं निरर्थकमिति अवगच्छेम । कोपि किमपि दूषयतुं अस्मान्, अङ्गीकरोति वा नास्ति वा, परिहसतु न वा अस्माकं व्यवहाराः कर्माणि, चिन्ताश्च समीचीना इति यदि अस्माकं धारणा अस्ति तर्हि अन्यत्किमपि अस्मान् न बाधते इति ज्ञायते । तादृशानां मनोवाग्वृत्तयः तथैव स्युः ।

जीवनस्य निरर्थकतां क्षणिकताञ्च विज्ञाय जीवनस्य भागद्वयमपि सविनयं अहङ्कारं विना कश्चित् यापयति तर्हि तेन ज्ञेयं विषयं परिज्ञातम् । तादृशः पुरुषः विद्यासम्पन्नो भवति । कामक्रोधमदमात्सर्यादयः तं लेशतोऽपि न बाधते । साधुपथमपि एकस्यैव मार्गः सर्वैनानुस्त्रियन्ते । मनुष्यमनसः नानात्वमेवैतस्य कारणम् । यौ कावपि द्वौ व्यक्ती समानौ न भवेताम् ( No two individuals are alike ) इति प्रकृतिव्यवस्था भवति ।

वाचिकं मानसिकं कायिकं बौद्धिकञ्च यद् कर्म क्रियते तदेव अस्माकं सत्तां निरूपयति । तत् कथं तर्हि सर्वेषु एकवद्भवति । परं सान्मार्गिकतायाः सार्वत्रिकसत्यानि अनुसृत्य  जीवति तर्हि कोऽपि असमर्थः नास्तीति अवगम्य, स्वपथे सञ्चरति तर्हि जीवनं शान्तिपूर्णं कर्तुं शक्यते ।

किमपि अविज्ञाय जीवन्ति मानवः । प्रतिक्षणं सुखसौकर्याणि आदातुं वर्धयितुञ्च अनुसन्धानानि क्रियन्ते । तथापि जननमरणविषयेषु शास्त्रं कस्मात् मौनमवलम्बते । सुखस्याभिवृद्धया सहैव आयुरारोग्यप्रवर्धनं, मृतिनिवारणं च यावन्न क्रियते शास्त्रं तावत् उपनिषदः अस्माभिः विश्वसनीया एव । यतः ताः एव एतेषां सर्वेषामपि स्पष्टमुत्तरमस्मभ्यं यच्छन्ति ।

‘प्रज्ञानं ब्रह्मे’ति ऋग्वेदोपनिषदः ऐतरेयस्य महावाक्यं अस्माकं अन्तर्वर्तमानबोधसत्ता एव ईश्वरचैतन्यमिति वदति । इदं च लक्षणावाक्यं भवति । ज्ञातृज्ञेयज्ञानेषु ज्ञातारज्ञेयमतिरिच्य ज्ञानं केवलमवशिष्यते । आत्यन्तिकं ज्ञानमेव ब्रह्म । यदैकस्य देहवियोगः सम्भवति ततः निर्गतजीवचैतन्यं अस्माकं मांसचक्षुभ्यः अगोचरां वर्तते तद्वत् जगद्व्याप्तमिदं तुरीयचैतन्यमपि दृष्ट्यगोचरं विद्यते । इदं अगोचरसत्यं योगमार्गेण साक्षात्कृतवन्तः अस्मद् ऋषिवर्याः । तम् एव साक्षात्कारः प्रदर्शयन्त्युपनिषदः ।

भागवते कश्चन परामर्शः विद्यते । समस्तजीवजालान्यपि संसृज्य आत्मज्ञानिनं कञ्चिदपि सृजेदिति मत्वैव मनुजः सृष्टः । तेन ईश्वरः ज्ञेयश्चेद् ज्ञास्यत्येव । ‘तदैक्षत बहु स्यां प्रजाययेति’ति [28]। इति छान्दोग्ये उच्यते । सृष्ट्यां स्वयमेव सन्निविष्टमिति एतद्दर्शयति । ‘एकं सत् बहु स्याम्’ इति बोधसत्ता स्वयं विचार्यते सृष्टेः प्रथमं तेजः पुनः आपः ततः अन्नं अन्ते मानवं च ससर्ज ।

कणानां सञ्चयः जलाशयः इतिवत् इमाः सत्ताः ईश्वरादागत्य ईश्वरे एव लीयन्ते । तन्मध्ये परिवर्तमाना अनुभवा एव जीवनं नाम । कर्मानुसारं जीवनं श्रेष्ठं कृत्वा संसारचक्रतः आत्यन्तिकविमुक्तिं प्राप्य परमात्मनि लयनमेव आत्यन्तिकमोक्षः ।

[28] Chandogyopanishad(6.2.3)

उपनिषद्भिः मनुष्याणां महनीया भावाः समाद्रियन्ते तेन सह नीचविकारेभ्यः तं विमोच्य प्रकाशं प्रति नेतुं उद्यमः क्रियते । पिपीलिकापक्षाणां सञ्चयनशीलतेव साध्यतावत् भ्रमरचित्तस्य उड्डयनेच्छायाः उद्यमाः इव अस्माकमन्तः अपि तादृश्यः अनन्तशक्तयः सन्ति । मनसः साहाय्येन ताः प्रत्यक्षीकरणीयाः । भौतिकताहीनात्मीयता आत्मीयतारहित भौतिकता च पङ्ग्वन्धवत् विकलैव । अनयोः समन्वयः एव यथार्थशिक्षणं नाम।

अस्माकं कर्मणां अकर्मणां च फलानि नूनं अनुभोक्तव्यानि । एतद् के जानन्ति । मां कोऽपि न जानाति इति निष्क्रियत्व फलमपि कुत्रापि न गच्छति। तदपि तस्मिन्नेव पतति । कियन्तो विस्मयान् उपनिषदः प्रदर्शयन्ति । वृथा कोऽपि मनुष्यः जननमरणाभ्यां विमुक्तो भवति । अस्माकं मनुष्यजन्म किमपि निष्फलं कार्यं न भवति।

आत्महत्या सर्वस्यापि प्रतिविधिरिति मन्यमानाः मूर्खाः एव । तेषां कर्मणां फलं तैरेव वोढव्यमिति महासत्यं उपनिषदः अवबोधयन्ति अस्मान् । यथार्थजीवनं आन्तरिकज्ञानेन सम्बध्येत । कोऽपि तन्नावगच्छति । नेत्रे पिधाय तमः सृजन्ति ते । सत्कर्मणां दुष्कर्मणां च फलं अस्माभिरेवानुभोक्तव्यमिति वदन्ति उपनिषदः । जीवनस्य सश्रद्धं निरीक्षणेन एतदवगन्तुं शक्यते । अवगन्तारः कथं दुष्कर्माणि कुर्युः । अन्येषां गर्हणाय व्यापादनाय पीडनाय च कथं प्रयतेरन् । सर्वोत्तमं सत्यवचनं भवतीदम् । अन्तः भास्वन्तीं

प्रभामपश्यन्तः वयं लौकिकतायाः तमसि वृथा भ्रमामः । अन्तर्ज्योतिः द्रष्टुं विद्याभ्यासः एव शक्नोति ।

रोण्ड बयणस्य(Rhonda Byrne) ‘द सीक्रट्’, ‘अण्लिमिटड् पवर्’ प्रभृतयोग्रन्थाः युगेभ्यः पूर्वमेव उपनिषद्भिरनावृतसत्यं भवति । आल्डस् हक्सिलेः ‘द पेरणियन् फिलोसफि’ नामकग्रन्थेऽपि एतमेव प्रकाशं प्रसारयति । जनानां कृषिः, गवादिकं, सम्पद् च भवन्तु नाम उपनिषद्मन्त्राः अनुशासन्ति चेदपि तत्सर्वं केवलं लक्ष्यप्राप्तये विहिताः मार्गाः इति क्रमेण वयं जानीमः ।

आध्यात्मिकज्ञानं स्वात्मज्ञानमित्यतः सत्याधिष्ठितमित्यतश्च तद् धर्मनिरपेक्षं, कालातीतं, जात्यधीतं, वर्गवर्णदशातीतं च वर्तते । प्रत्येकंव्यक्तेः अपि जन्मावकाशोऽपि अस्ति । अगण्यबिरुदाः सम्पाद्य मनुष्याः स्वस्य पैतृकं, संस्कारञ्च अजानन्तः प्राकृताः इव वर्तन्ते ।

राष्ट्रान्तरं गत्वा बिरुदानि संपादितवतां जनानां शारीरिकभाषाः अपि अत्यन्तं विपरिणमयन्ति । कस्यामपि उन्नतश्रेण्यां वर्तमानः इति मन्यमानस्य तस्य जीवनमपि नितरां भिद्यते । समूहस्य आसक्तिः इदानीं तादृशान् प्रति भवति । राज्यान्तरेषु उन्नतपदवीमलङ्कुर्वन्तः स्वराष्ट्रसम्पदं नाभिजानन्ति । अस्य परिहारस्य औषधमपि विद्या एका एव ।

आधुनिकविद्याभ्यासस्य वक्तारः उपनिषद्विद्याभ्यासद्वारा संस्कृतिश्च राष्ट्रे पुनरानेतुं सुदीर्घः कालोऽपेक्षित इति तर्कयेयुः। परं नूतननयान् शीघ्रम् अनुवर्तन्ते जनाः ! विदेशानां प्रशिक्षणादिसंविधानेभ्यः कोट्यधिकरूप्यकाणि व्ययीकुर्वन्ति । साहित्यकलादयः एतैः सहैव विस्मर्यन्ते । तेषां दुरन्तरफलान्येव अद्य दृश्यन्ते । केऽपि आचाराः, भूतप्रेतपिशाचश्च न भयावाहाः । धैर्यं स्थिरताञ्चावलम्ब्या स्थातव्यमित्युपनिषद आदिशन्ति।

सर्वानर्थानां मूलकारणं अज्ञता एव ।परन्तु निखिलमपि लोकं आहत्य स्थितौ अस्याः शक्तिरस्ति । शङ्कराचार्यः ब्रह्मसूत्रभाष्ये उपनिषद्प्रतिपाद्यं ब्रह्म अस्मद्भिन्नं अमूर्तं सत्यं न किन्तु तदस्मासु एव वर्तते इति वदति । तदेवास्माकं चैतन्याधायकः परमात्मा इति च ।

ईश्वरं दर्शयति चेदहं विश्वसामि इति उक्तवते विवेकानन्दाय तस्य गुरुः स्वस्मादपि अन्तिके ईश्वरं दर्शयामीत्युक्त्वा तस्य हृदि स्पृष्टवान् तदा विवेकानन्दस्य ज्योतीरूपं दृष्ट्वा सर्वं व्यस्मरत्।

कति पुरोगमनवादिनः, विमर्शकाः, चिन्तकाश्च सन्ति अस्मान् परितः । तत्र सर्वत्रापि वर्गीयता, देशीयता, जातिपरचिन्ताः इत्यादिकं पुनराविर्भवानि उपनिषद्दर्शनानि मानवदर्शनानि भवन्ति । मनुष्येषु मनुष्यत्वं निर्मातुं शक्तानि विश्वमानवदर्शनानि भवन्ति इमानि ।

प्रपञ्चचित्रस्य अज्ञतायाः अनुसन्धाने श्रद्धा सिद्धताः यदा क्रियन्ते तदा तैरनुसन्धातृभिः ईश्वरो अवश्यं वन्द्यः इति ज्ञायेत । ष्रोडिङ्ङर्, माक्स्प्लाङ्क्, हैसण् बर्ग्, ऐसक् न्यूट्टण्, आल्बर्ट् ऐन्स्टीन् प्रभृतयः अनेके शास्त्रातिचक्षणाः ईदृशाः भवन्ति । ए.पि.जे. अब्दुल्कलां महोदयस्य एतद्वन्दनं कतिवारं वयं दृष्टवन्तः । तथा च ज्ञानसीमा अनुक्षणं प्रवर्धमाने अस्मिन् अण्डकटाहे ईश्वरं अनभिवन्दिताः कति शास्त्रज्ञाः भवेयुः ?

इन्द्रियसुखानि अन्विष्यमाणाः जनाः कथं स्वस्य गतिनिर्णयं जानीयुः? स्थानमानवित्तानि ते लभेरन् तथापि तस्मादपि अग्रदर्शिनः स्युः । पण्डितपामरभेदं विना सर्वेषु अपि अनुपमं दिव्यञ्च सौन्दर्यं गूढं वर्तते । एतदर्थं आध्यात्मिकज्ञानमावश्यकम् । अस्माकं अभिलाषप्राप्तये बहवः उपनिषन्मन्त्राः सन्ति । तदा आत्मनः कर्मफलानुसारं स्त्र्यादि योनिषु अधोयोनिषु च जन्म प्राप्तुमर्हति मानवाः। सामान्यैः अवगमनायोग्यानि उपनिषद्तत्त्वानि शङ्कराचार्यानन्तरं विवेकानन्दः, नारायणगुरुः एवमादयः अनेके महात्मानः अवाबोधयन् । वयं यत् कर्म श्रृद्धया कुर्मः तस्य फलं अस्माकं समीपमेव आगच्छति । परधनं नैव कामयेत ।

मानवाः बहुधा भिद्यन्ते चेदपि ते सर्वेƒपि कयाचिद् आन्तरिकसत्तया निबद्धा भवन्ति । भौतिकसम्पदां आधिक्येƒपि मनः समाहितं न भवति कस्यापि । सदाचारपालनं नास्ति चेत् संसारः अनीतेः अराजकत्वस्य च करालहस्तेषु निपतेत्।

युष्माकं मस्तके दुर्ग्राह्य मत एवार्धके निधाय प्रलपनं नास्ति विज्ञानसंग्रहात्मिका शिक्षणं। जीवनसंरचनात्मक मनुष्यत्वविधेय स्वभावशुद्धिरवर्धकाशयानां स्वांशीकरणमेव तद् इति स्वामि विवेकानन्दः कथयति [29]।

अद्य केवलं परीक्षायां अङ्काः प्राप्तुं वृथा अधीयमानाः छात्राः परीक्षासमनन्तरं अधीतविषयान् विस्मरन्ति । जीवनविकासाय न किमपि ज्ञानं सः प्राप्नोति । चरित्रपौरधर्मशास्त्रभाषापठनादिकं सर्वमपि एतदर्थमेव ।

रङ्गनाथस्वामिनः 'उपनिषत्सन्देशं' नामकग्रन्थे वदति यत् शिक्षणमेखलायां सर्वत्र दुरवस्थाः सन्ति । नीतिं अधीत्य पुनः नीतिनिषेधी जायते । पौरधर्मं पठित्वा पौरबोधं विना जीवति । शास्त्रज्ञाः शास्त्रीयवीक्षणं विना जीवति, एतत्सर्वं अस्माकं शिक्षणसम्प्रदायस्य वैकल्यमेव सूचयति। तादृशः विद्याभ्यासः आशयान् न पुनरुज्जीवयेत् । यथार्थविद्याभ्यासः स्वभावदृढतां, कर्मकुशलतां, विकस्वरव्यक्तित्वं च प्रददाति । एतेषां अभिवृद्धये सम्यक् अधीत्य स्वात्मीकुर्यात् । अजीर्णाहारः यथा शरीराय दोषः तद्वत् अजीर्णज्ञानमपि मनसो न हितं भवति । कौशलं औद्धत्यं च अदग्धविज्ञानस्य दुष्फलानि भवन्ति । यत्र सात्मीकृतं यथार्थं च विज्ञानमस्ति तत्र कापट्यं न भवति [30]। इति ।

[29]Vivekananda Sahityasarvaswam.Vol.iii.Page190

[30].Page.169

नवलोकस्य कुञ्जिका भवति विद्याभ्यासः इति आधुनिकशिक्षणस्मान् अवगमयति। विद्याभ्यासः एव अस्मभ्यं उद्घाटितपथं प्रयच्छति इति च 'बार्ट्रान्ट्ररस्सल:' तस्य विद्याभ्यासाभिधेये ग्रन्थे वदति ।

……..✷♦✷……..

द्वादशः अध्यायः

# केरलस्य शिक्षणवीक्षणानि

भारतस्य विशिष्य केरलानां शिक्षणमण्डलस्य दिशाबोधस्य प्रणाशेन कालाः अतीताः । परिवर्त्यमाना शिक्षणपद्धतिरिति अब्दुल् हकीम् महोदयस्य ग्रन्थद्वारा । समकालिकशिक्षणानुभवाः इति शिक्षणविचक्षणाः प्रवदन्ति । शिक्षणप्रणाल्याः नशीकरणप्रवणतामधिकृत्य स्पष्टं चित्रं गतकाल दृश्यकलासाहित्यापचयो यदि सूक्ष्ममवलोकते तर्हि अविज्ञायते । “केरलानां शिक्षणपद्धतिः ह्यः अद्य श्वः” इत्यत्र पुस्तके बि. इक्बाल् महोदयेनोच्यते - परिवर्तनात्मकसर्वकारेषु स्वेषां सङ्कुचिततात्पर्याणां संरक्षणार्थं समुदायसंघटनानां राष्ट्रियकुतन्त्रतायाः फलमेव आधुनिकशिक्षणं नाम ।

केरलस्य सर्वकारीयविद्यालयेषु कलालयेषु च विद्यां अभ्यसतां बह्वः विशेषाः आसन् । शैक्षणिकनैपुण्यं सम्पादितवन्तः भिन्नभिन्नमेखलासु पटवः केरलीयाः कथमेवं निपुणाः अभवन् इत्यस्य समाधानं भवति अत्रत्य शिक्षणस्य गरिमा । परन्तु वर्तमानकालस्य शिक्षणमण्डले एते गुणाः अस्तं गच्छन्ति । अस्माकं शिक्षणव्यवस्थायाः श्रेष्ठता अनुदिनं ह्रसति इति अतर्क्यः विषयः एव । अणुकुटुम्बव्यवस्थितिः यावत्प्रारब्धा तावता छात्राणां अध्ययनविषये पितृणां तात्पर्यं संवर्धितं दृश्यते । अत एव तेषां नैसर्गिकवासनाः अग्रेनेतुं ते पराभूताः अन्वभवन् । मानवजनता भ्रान्तचित्ता सर्वत्र अटन्ति ।

असंस्कृतवस्तूनां क्षयः, शुद्धजलदौर्लभ्यं, भक्ष्यवस्तूनां निर्माणविषये स्थिता अक्षमता, जनसंख्यावृद्धिः इत्यादिकं भाविनिकाले भीतिदाः विषयाः एव । तदभिज्ञातुं प्रतिरोद्धुं च अयतमाना नूतनशास्त्रसाङ्केतिकता तस्य परिहारः कल्प्येतेति अन्धविश्वासः छात्रमनस्सु संवर्धयति आधुनिकशिक्षणपद्धतिः ।

यदि सामूहिकप्रतिबद्धचित्ताः अध्यापकाः स्वेषां दायित्वं समये न पूर्तीकुर्वन्ति तर्हि अवश्यं पुरतो वर्तमानः लोकः अन्धकारसमावृतो भविष्यति । श्री. एम् . आर्. राघववार्यर् महोदयेन शिक्षणपरिष्करणस्य निर्वचनमेवं दीयते – देहदास्यं, जीवनदास्यं, आत्मदास्यं, ज्ञानदास्यमिति चतुर्णामपि दास्यानां निवारणेन स्वतन्त्रपौरान् संस्रष्टुं निर्णीता सफला पद्धतिरेव शिक्षणपरिष्करणेन उद्दिश्यते । अत्र लोकसंस्कृतीः बहिष्कृत्य एतत्सर्वं करणीयमिति मेधावन्तः केपि न वदन्ति । भारतीयज्ञानस्वरूपस्य चरितमनुपश्यन्तः अवगच्थन्ति यत् एकैककालेष्वपि भारतेन सम्पादितविविधविधविज्ञानानि समादाय ज्ञानसंवर्द्धनं कृत्वैव अस्माकं ज्ञानपरम्परा लोकसमाराध्या अभवत् । अनेककार्याणि पुरोगतये उपादेयानि सः ।

आर्. वि. जि महोदयेन द्विविधानां पौराणां सर्जने गोपिताः दोषाः प्रस्तूयन्ते युगपदेव श्वस्तन विद्याभ्यासः कथं स्यादित्यपि निर्दिश्यते । पाठ्यपद्धतौ सहवर्तित्वं अवश्यं भवेत् । अद्य छात्राः ज्ञानसम्पादनं

आधुनिकोपाधिभिः कुर्वन्ती अत्रैक अभिप्रयाणाय को वा प्रभवेत् इत्यपि आशङ्कते ।

देशीयतले प्रचारित नियो-लिबरल् वीक्षणेभ्यः विचलितुं केरले नेच्छन्ति। एवञ्च गतविंशतिवर्षाभ्यन्तरे केरलराज्यस्य शिक्षणमेखलायां वाणिज्यमूल्यानां तत्त्वानाञ्च प्रभावः तत्र तत्र द्रष्टुं शक्यते । शिक्षणस्य वाणिज्यवत्करणं, आङ्गलेयविद्याभ्यासस्य सांस्कारिकापचयश्च विवृणोति हमीद् चेन्नमङ्गलूर् महाशयः ।

ईश्वरमुक्तः धर्ममुक्तश्च आधुनिक शैक्षणिकपद्धतिः शास्त्रसाङ्केतिक मण्डलेषु महान्तिपरिवर्तनानि सृजेयुः तथापि तादृशाः छात्राः अधार्मिकाः अराजकत्ववादिनश्च भवितुमर्हन्तीति सत्यं निदर्शयति श्री .ओ. अब्दुरह्मन् । राक्षसीयसाक्षरता पुनराविष्करणीया इत्यपि सः अभिप्रैति ।

अस्माकं अस्तित्वं वर्षेभ्यः पूर्वमेव विनष्टम् । सर्वेपि अन्येषां व्यवहाररीतीः काङ्क्षन्ति । किमर्थमस्माकं भूविभागस्य सविशेषतानुसारं, आचारविचारविश्वासादिकं समीक्ष्य शिक्षणनयाः न पुरःस्थापयन्ति । अस्माकमस्त्वित्वमेव अस्मभ्यं रोचते खलु । शिक्षणमातृकाः स्वीकर्तुं वैदेशिकं कोपि अस्मद्राज्यं प्रविशन्ति परं तेषां आगमनोद्देश्यं केवलमस्माकं पैतृकार्जनमेव ।

आगोलवत्करणाय शिक्षणं भवेत् तद्विरुद्धमपि शिक्षणं सम्भवेत् भवितव्यं च। अस्माकं समाज एव स्पनशिक्षणस्य रचनां करोति । स्वस्य प्रज्ञायां विश्वासवतः कस्यचिद्भारतीयस्य, केरलीयस्य इमाः वाचः इति सिविक् चन्द्रेण ईर्यते । अत्रत्य कोलोणियल् शिक्षणं कालान्तरे किमजनयत् । अत्रत्य शैक्षणिकसमप्रदायान्, आचारान्, आहारवस्त्रगार्हिकरीतिश्च तेन परिवर्तिताः किं बहुना प्रकृतिमेवापर्यणयत् ।

जीर्णचित्ताः बुद्धिहीनाः स्वयं आधुनिकाः इति उद्घोषयन्ति । किन्तु आधुनिकतायाः परिवेषः यदा न दीयते स्म पूर्वं तदानीमत्र कति शास्त्रप्रतिभाः समजनिषत । कति महान्तिकार्याणि समासादितानि । इदानीं आधुनिकतां संवर्ध्य शिष्यमाणसदाचारं अपि उन्मूलयति। मानवानां स्वार्थता कापट्यस्य वेषं धारयन्ती बहिरानीता । सुविख्याताः केचन एतस्य अवसरस्य विनियोगं कुर्वन्ति । समाजपोषिताः ते स्वेच्छापूरणाय तमेव समूहं उपयुज्य स्वार्थलाभाय प्रवर्तते । भारतस्य लज्जावहः विषयः एषः । कथं पुनः अस्य मुखं विकृतं न जायेत ।

बाल्यकौमारादीनविज्ञाय अननुभूय अस्माकं युवजनता कौमारे एव वार्द्धक्यग्रस्ताः । नूतनसाङ्केतिकतायाः विषये एव ते परस्परं भाषन्ते । तन्मध्ये रुचिकरं भोजनमपि बहु भुङ्क्ते । अन्तरिकलोकमजानन्तः इमे एतावत्कुर्वन्ति । पुनः किमर्थमेते विद्यालयाः ? किमर्थं शिक्षणम् ?

गतागतनियमाः, सुव्यवहाराः, व्यक्तिशुचित्वं, इत्यादि मौलिक कार्याण्यपि तत्र न अधीयन्ते । पथि ते यदा सञ्चरन्ति तेषां मुखबाहुश्रोत्राणि कार्यं कुर्वन्ति । अद्यतनछात्राणां वेषभूषादिकं तु वक्तव्यमेव न। विकृतवेषधारिणः ते पाश्चात्यसंस्कारमनुसरन्तः अभवन् ।

मातापितरः तेषां कार्यसिद्धये केवलोपाधयः भवन्ति । विद्यार्थिराष्ट्रियं तस्मादपि विचित्रं दृश्यते । तेषां प्रस्थानस्य मूल्यानि तदीयाशयाः इत्यादिकं वक्तुं न शक्नोति कोपि छात्रः । कियत्यः शिक्षणरीतयः आसन् पुरातनकाले विद्यालयेषु । गुरवः पितृस्थानमप्यलङ्कुर्वन्ति स्म । छात्रे तस्य सम्पूर्णस्वातन्त्र्यमासीत् । सामदानभेददण्डेष्वन्यतमं दण्डोपायं स्वीकर्तुं तेषां अनुमतिः नास्त्यद्य । किन्तु छात्रैः शक्यते । यदि गुरुणा कोपि छात्रः दण्ड्यते तर्हि तस्य जीवनं तदानीमेव परिसमाप्येत ।

बाल्ये एव तस्य समस्याः ज्ञातुं पितरः इव गुरवः अपि विस्मृतवन्तः स्युः। तदेव बहवः सञ्जायेरन् भाविनिकाले । मातृभाषायां संभाषितुं लेखितुञ्च अजानन्तः बहवः छात्राः विद्यन्ते अस्मान्परितः । धूमपानं कृतवते छात्राय यदि गुरुः अर्थदण्डः दीयते तर्हि सः ततोप्यधिकं धनं दातुं सन्नद्धो भवति । अतिविशिष्टं मण्डलमित्यतः शिक्षमस्य आसूत्रणं निर्वहणञ्च केन्द्रीकृतरीत्या करणीयं भवति । एन्. सि. इ. आर्. टि. प्रभृतयः संस्थाः इतोप्यधिकं करणीयम् भवति ।

केन्द्रीकृता सुसंघटिता च शिक्षणमेखला एकैव अस्माकं शिक्षणविकासाय साहाय्यं करोति । शास्त्रीय मतेतर जनाधिपत्य सार्वत्रिकशिक्षणस्य आयोजनाय सार्वकारीयशिक्षणविभागः नूनमत्र तिष्ठेत् इति एम्. षाजर्खान् महोदयस्य वाचः चिन्तनीयाः एव । इन्फर्मेषन् आन्ट् कम्म्यूणिकेषन् टेक्नोलजी द्वारा कल्पितप्रयोजनानि अस्माकं छात्रैः सम्पूर्णतया लब्धानि वेति सन्देहस्य विषयः। शिक्षणमेखलासु अस्य प्रयोगेण द्विवारं देशीयपुरस्कारः केरलाय लब्धमिति आश्चर्यं जनयति ।

पि. प्रेमचन्द्रस्य वीक्षणे कतिपयांशाः विचार्यन्ते अत्र । तदित्थं – ऐ. सि. टि. शिक्षणेन किं प्रयोजनमभवत् । अध्याकानां परिशीलनवेलायां तेषां नैपुण्यसंवर्धनाय एतेषां प्रयोजनं कियदासीत् । विद्यालयस्य समाजेन सह सम्बन्धः निर्मातुं ऐ.टि. कियत् सहाय्यमाचरन्ति इत्यादिप्रश्नानां पुरतः निर्लज्जमुपविशन्तः अधिकारिणः ।

इतरेभ्यः अधिकज्ञानं सम्पाद्य अग्रेसरः भवेत् इति आशयस्य परिमार्जनमेव नूतनशिक्षणव्यवस्थायाः विशेषः । शैक्षणिकपरिष्काराः तेषां गुणदोषावलोकनं च आधारीकृत्य किमप्यध्ययनं केरले सञ्जातं वा । मातृभाषामपि अजानन्तः गणितादि शास्त्रविषयाणां मौलिकतत्त्वानि अजानन्तः प्रभूतं छात्राः अधुनापि विद्यालयेषु सन्तीति च निरूपयति श्री. पि.के. अब्दुल्हकिमः ।

शैक्षणिकपद्धत्याः परिणामाय कटिबद्धा वयम् । अलिगढ्-कुसाट्सर्वकलाशालयोः प्राक्तन उपकुलपतेः श्री.पि.के. अब्दुल् असीस् महोदयस्य अध्यक्षतया विदग्धसमितिः एतदर्थं प्रवर्तनसज्जा अभवत् ।

एकस्य समूहस्याधःपतनं सामान्यतया तत्रत्य शिक्षणाधिष्ठितं वर्तते इत्यतः समूहः कथञ्चिदपि पुरतो गच्छतु इति चिन्तां परित्यज्य अस्माकं समाजस्य सर्वदा सर्वथा च उन्नमनं अभिलक्ष्यैव समाजपरिवर्तकाः विद्याभ्यासविचक्षणाश्च प्रयतेरन्। तेषां आशयाः शिरसा वहेत् अनुसरेयुश्च ।

जनितकवैकल्यहेतोः अङ्गानां क्रमातीतवर्धनमिव भवति आधुनिककालस्य उन्नतविद्याभ्यासः इति डाँ. असीस् स्वस्य 'शैक्षणिकचिन्ताः' नामके ग्रन्थे सूचितवानासीत् । यदि आर्जितविद्या युद्धादिभीकरतायाः अक्रमानीतेश्च परिवर्तनं न करोति तर्हि सा कीदृशी विद्येति पृच्छति सः । अत्र बहूनां महात्मनां विद्याभ्यासवीक्षणानि उल्लिखितानि सन्ति । यथा - सेन् गुरुणां शैक्षणिकतत्त्वानि, ग्रीक् चिन्तकस्य प्लेटो महाशयस्य मौलिकशिक्षणस्य नयाः, जीन् जाक्सिस् रूस्सो(Jean Jacques Rousseu) महोदयस्य नेगटीव् एड्यूकेषन्, पौलो फ्रयर् इत्यभिधेयस्य पीडितानां बोधनशास्त्रं, महात्मागान्धिनः शैक्षणिकसमीक्षाः, उद्योगाधिष्ठितशिक्षणं च, विश्वमहाकवेः रवीन्द्रनाथठक्कुरस्य शिक्षणविपरिणामः, पाश्चात्यचिन्तकस्य बर्ट्रान्ड् रसल् नामकस्य विभिन्नमतानि, शिक्षणसमीक्षणकारस्य जिद्दुकृष्णमूर्तेः विद्याभ्यासचिन्ताः, प्रोफ़सर् एम्. एन्. विजयनस्य चिन्ताशकलाः, के. इ. एन्

महाभागस्य विचाराः इत्यादयः सर्वेपि अंशाः सारल्येन आविष्कृता दृश्यन्ते । राष्ट्रस्य अधोगमनं दृष्ट्वा महान्तः विलपन्ति।

विद्याभ्यासो नाम बहूनां विज्ञानानां भारोद्वहनमिति आशयः नास्ति । सुपथां प्रत्यभिज्ञानं, जीवनपुरोगतिः आह्लादपूर्णजीवनमित्यादि सर्वमपि तत्रान्तर्भवन्ति। मनुष्याणां पूर्णतायाः आविष्कार एव सः । सङ्गीतं, रचनात्मकता, कायिकविद्याभ्यासः, मूल्याधिष्ठितमध्ययनम्, तत्त्वशास्त्रं, इतरकलानां समन्वयः एतत्सर्वमपि अध्ययनविषये अन्तर्भाव्यम्। उपनिषदामध्ययनवत् गुणप्रदं विकासोन्मुखं च अध्ययनं न किञ्चिद् वर्तते इति सुविदितवान् पाश्चात्यतत्त्वज्ञः षोप्नोवर् महोदयोपि अभिप्रैति ।

वैदिकचिन्तानां प्रभवकेन्द्रत्वेन अभिधीयमानासु उपनिषत्सु मानविकचिन्ताः तस्य पारम्यतां प्रयाताः इति माक्स् मुल्लर् महाशयः कथयति। स्पानिष् ग्रन्थकारेण जे. मस्कार्णो महोदयेन उपनिषदां आत्मा हिमालयश्रृङ्गेभ्यः उपमीयते । 'न्यूयोर्क् टैम्स्' वाचनादृते उपनिषदः पठन्तु इति तोरो अमेरिकीदेशीयानवदत् । नीषे, कैसर्लिङ्, जि.डब्ल्यू रसल्, एमेळसन्, प्रभृतयः चिन्तकाः वाल्ट् विट्मान्, आल्डस् हक्सिलि, सोमर्सेट् मोम्, डब्ल्यु. बि. यीट्स्, टि.एस्. एलियट् आदयः साहित्यकाराश्च उपनिषद्भिः प्रभाविताः सन्ति । मुगल् राजस्य पारिवारिकः दारा, राजा राम् मोहन् रोय्, अरविन्दघोष्, डॉ. एस्. राधाकृष्णः, जवहर् लाल् नेह्रु, महात्मागान्धी इत्यादिषु अपि उपनिषदां स्वाधीनं द्रष्टुं शक्यते ।

……..✷♦✷……..

त्रयोदशः अध्यायः

# शिक्षणस्य लक्ष्यम्

शिक्षणस्य परमं लक्ष्यं ज्ञानप्राप्तिरेव तद्वारा मोक्षप्राप्तिश्च । महाभारतस्य शान्तिपर्वणि इत्थमुच्यते –

मनसश्चेन्द्रियाणां चाप्यैकाग्र्यं परमं तपः
तज्ज्यायः सर्वधर्मेभ्यः स धर्मः परः उच्यते [31]।

मनसः ऐकाग्र्यमेव ज्ञानप्राप्तौ हेतुः । परन्तु मनः साम्प्रतं तस्य शक्तीः बहुधा विकिरति । इयं एकाग्रता कथं साध्यं कर्तुं शक्यमिति उपनिषदः अस्मान् उद्बोधयन्ति । एको जातिः एको धर्मः, एको देवः इति उक्त्वा श्रेष्ठशिक्षणं प्रदर्शितवान् श्रीनारायणगुरुवर्यः ।

सर्वेषु प्राणिषु ईश्वरं द्रष्टुं मतानामाह्वानानि समीचीनान्येव । उत्तमकार्याणि स्वीकर्तुं अङ्गीकर्तुं च यस्य मनः अस्ति तादृग्व्यक्तिरेव शिक्षणं प्रयोजनप्रदं कर्तुं शक्नोति । विद्याध्ययनस्य केवलमेकं लक्ष्यं न पर्याप्तं भवति । तत्र प्राप्तुं ज्यायांसो मार्गाः अपि आवश्यकाः एव । कर्मणः प्राधान्यं एकैकोपि छात्रः अवगच्छेत् । युद्धभूमौ परिभ्रान्तचित्तायार्जुनाय कृष्णः यथा धर्मोपदेशाः

[31].(249.4)

प्रदत्ताः तथा अस्माकं छात्रेभ्यः कर्मणः गुणदोषाः, अकर्मतायाः दोषांशांश्च बोधयेत् ।

स्नेहस्य जीवनमूल्यं दृष्ट्वा श्रुत्वा अनुभूय च विद्यार्थिना ज्ञातव्यम् । कस्यचिद्मनुष्यस्य मानविकतायाः प्रथमलक्षणं भवति स्नेहः । स्नेहहीनस्य मनसि प्रकाशः नैव दीप्यते । क्लेशेन सम्पादयितुं मेधां उपयोक्तुं च सः अविरतं प्रेरणीयः । त्यागमनोभावः बाल्यादेव शिक्षयेत् । विद्यासम्पादनं, प्रतिसन्धीनां अतिजीवनं, अवश्यं ज्ञेयाः पाचकवृत्तयः, शुचित्वं, परिस्थितिसंरक्षणं, कृषिकर्म, उद्यानर्निर्माणं, कलासाहित्यपरिचयः, सहजीविस्नेहः इत्यादिविषयाः पाठ्यपद्धतौ योजनीयाः ।

आध्यात्मिकतत्त्वानि प्राथमिकस्तरादारभ्यैव कथाभिः पाठ्यांशैश्च द्वारा दातुं शक्यते । निष्कामकर्माणि कर्तुं सः प्रेरणीयः । जननात् पूर्वमेव एकस्मिन् शिक्षणप्रक्रिया समारब्धा स्यात् । तच्च आमरणं सन्तिष्ठेत । तस्मात् एकैकस्मिन्नपि सोपाने श्रद्धा प्रदेया । श्री अरविन्दघोषः अभिप्रैति यत् शिक्षणस्य प्रमुखतया पञ्चस्थानेषु श्रद्धा कार्या । तानि च भौतिक जैविक मानसिकातीन्द्रियात्मीयानि भवन्ति । अद्य वयं ततोप्यधिकमेखलासु प्राधान्यं गणयामः । तथापि प्रयोजनं नास्ति किमपि । परं मनुष्यस्य प्रमुख स्पर्शमण्डलानि एतानि भवन्ति ।

सम्यग् हसितुं बालाः अपि न शक्नुवन्ति । महासङ्घर्षाः अत्यल्पेभ्यः मनोवैषम्येभ्यः सञ्जायन्ते । अतः छात्राणां मनसः सद्वृतिं प्रदर्शयितुं कश्चन विदग्दोपदेशकसङ्घः प्रतिविद्यालयं भवेत् इति नित्यचैतन्ययतिमहापादाः अभिप्रयन्ति ।

उपनिषदामाशयः न केवलं ज्ञानार्थिभ्यः अपि तु तत्त्वशास्त्रतत्परेभ्यः, युक्तिवादिभ्यः भौतिकशास्त्रज्ञेभ्यश्च ततः बहूनि कार्याणि अवगन्तव्यानि सन्ति। यतः युक्तिपथमाश्रित्य अनुभूतिद्वारा अस्मद्धिषणां उत्तुङ्गे प्रतिष्ठाप्यते । विनायासं जीवनस्य एकैकमपि मार्गं सुगमं कर्तुमत्र निर्देशाः दीयन्ते । मनः इत्यस्य स्पष्टं विवरणं उपनिषद्भिः दीयते । आधुनिकमनःशास्त्रेण बोधसत्तां मनः च सम्यक् विशकलनं कर्तुं न शक्तम् । एतावता फ्रोयिड् महोदयस्य अभिप्राये बोधाबोधमण्डलानि सन्ती तथा च एषां प्रवृत्तयः व्यक्तेः पूर्वानुभवैः विशदयितुं शक्यते इति च अनुमन्यते । उपनिषदः मनः आत्मानं बुद्धिञ्च विविच्य पश्यन्ति । यथा –

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः [32]।।

[32] Katha Upanishad(1.3.10)

इन्द्रियेभ्यः विषयाः, विषयेभ्यः मनः, मनसश्च बुद्धिः, बुद्धेर्पुनः आत्मा च उत्कृष्टः वर्तते इति कठोपनिषदि उच्यते । शङ्कराचार्यस्तु स्थूलशरीरादपि अस्माकं सूक्ष्मशरीरं वर्तते तच्च सूक्ष्मशरीरं पञ्च प्राणान् पञ्चकर्मेन्द्रियाणि पञ्च ज्ञानेन्द्रियाणि मनः बुद्धिश्चेति ।

पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितं
अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम् [33]।।

मनोबुद्ध्यहङ्कारचित्तैः चतुर्भिः वृत्तिभिर्समन्वितस्य मनसः स्वरूपाणि भवन्ति – रागद्वेषभयक्रोधव्यसनेच्छास्नेहसन्तोषादयः । अहमिति भावः एव मनसः प्रथमस्वरूपम् । अस्मिन्नेव भावे मनः स्वयंपरस्वरूपाणि धरति । स्मरणं, विस्मरणं, प्रवृत्तिरिति तिस्रः प्रकृतयः अपि मनसः अस्ति । एते एव सत्वरजस्तमोगुणाः । एतैर्विना मनसः संस्थितिः नास्तीत्यतः मनोनियन्त्रणं नाम महता यत्नेनैव भवति । मनः संयमनं यस्य सिद्ध्यति स केनापि नाभिभूयेन । तस्मात् मनसः सत्त्वगुणः प्रवर्धनीयः भवति ।

मनः यदि सत्त्वप्रधानं तर्हि तेन सह सम्बद्धं सर्वमपि सात्विकगुणोपेतं स्यात्। एतस्याभ्यासः पूर्वमेव करणीयः भवति । यथाकालं एतेषामनभ्यासिनः छात्रान् सुपथं नेतुं आयासः वर्तते । विद्याभ्यासः इत्युक्तौ कस्यचिद् सर्वथा

[33] Atmabodham-12

विकासः इत्याशयः । यदि मनः विकलं तर्हि को वा विकासः । अत एव प्राथमिकस्तरीयशिक्षणं सुघटितं स्यात् । यतः पुनः तं कोपि रक्षितुं न शक्नोति। विद्याभ्यासपद्धतेः रूपवत्करणविषये अत एव महती श्रद्धा कार्या । तत् स्वार्थलाभाय कदापि न गृह्णीयात् ।

परिशुद्धमनसः एव विशुद्धस्वभावः समुत्पाद्यते । स्वभावशुद्धिहीनानां विद्या शून्या भवति इति महात्मागान्धिना निगदितमस्ति । अस्मिन् दृश्यप्रपञ्चे अगण्याः अनुपमपदार्थाः स्युः । सम्मोददायकाः अनुभवाः अपि भवेयुः । तेषां आर्जनं नास्ति जीवनस्योद्देश्यम् । ज्ञानेन लोकातीतानुभवः सम्पादयितुं शक्यते। तस्मादेव शिक्षणप्रक्रियया ईश्वरविश्वासं आध्यात्मज्ञानं च संवर्धयितुं यत्नः कार्यः। परन्तु साम्प्रतं तस्य विपर्ययः दृश्यते शैक्षणिकस्तरे । तस्य तिक्तफलानि वयं जानीमः अनुभवामश्च । सत्यं, विनयः, धर्मः, सदाचारः, सहजीवि-स्नेहमित्यादयः मानुषिकमूल्यवान् भवेत् कश्चिद्विद्यार्थी ।

उपनिषत्संस्कारः अन्धविश्वासः अथवा अनाचारः वा नास्ति । तत् अतिसूक्ष्मं, ईश्वरोन्मुखं, बुद्धिपरं च अस्ति । अनधीत्य किमपि शास्त्रं न गर्हयेत्। अस्मिन् जीवने कमपि अर्दयित्वा प्रतीकाकारेण वा यत्किञ्चदपि न प्राप्नुयात् । प्रज्ञानां युक्तियुक्तभाषणं संश्रुत्य क्रियते तर्हि पुण्यं लब्धुमवकाशः अस्ति तर्हि तत् स्वीकार्यम् ।

शिक्षणस्य उत्तमांशाः स्वांशीकृत्य व्यक्तेः राष्ट्रस्य च विकासाय परिश्रमः कार्यः । वादतर्कैः किं वा कार्यम् ? कोपि कमपि व्यक्तिं जेतुं अथवा पराजेतुं न शक्नोति । यतः तुल्यशक्तीनामेतद् साध्यं नास्ति खलु । अतीते काले अस्माभिः आर्जितं सर्वमुपेक्ष्य आत्मा देहं त्यक्त्वा गच्छति । इयमनिवार्यता बहुवारं दृष्टश्चेदपि तदवगन्तुं कोपि न चिकीर्षति। किमर्थमेतद्दुष्कर्माणि कुर्वन्ति । परस्परं साहाय्यसान्त्वनादिकं दत्त्वा स्नेहेन वयं वसामः खलु ।

देहत्यागे अस्मदीयं किमपि पुण्यं भूमौ इतरेषां प्रयोजनाय अवशिष्टम् भवेत् । कदाचित् तत् कर्म कस्यापि सन्तापं न्यूनीकरोति चेद् वरं भवति । इतोपि जन्मानि शिष्यन्ते अस्माकम् । विधिनियतजन्मानि श्रेष्ठं कार्यं वा नीचं करणीयं वेति स्वयं निश्चेतव्यम् । पल्लविताय सस्याय तस्यान्तरिक्षमेव नवमूर्जं प्रयच्छति । तस्य तत्रैव पुष्पितुं पल्लवितुं च शक्यते । यदि तत् सस्यमुद्पाट्य देशान्तरे रोपयति तर्हि कदाचिद् शुष्कं भवितुमर्हति। तद्वदेव भारतीयानां भारतसंस्कृतेः भारताम्बायाश्च उपयोज्यव्यवस्थितिः कुतश्चिदपि न मिलति । अन्यस्य कस्यापि राष्ट्रस्य संस्कारः अत्र वपति तर्हि तदपि भारतभूमौ शुष्कसस्यवत् भवति ।

परम्परागतशिक्षणरीतिः अनुवर्तनीया इति न । किन्तु कालानुसृतं तत्र परिवर्नानि कृत्वा पूर्वाधिकं मनोहरं सरसमास्वाद्यं च करणीयम् । भारतीयजनतायाः श्रेयः प्राप्त्यर्थं अत्रत्य सम्पद् उपयोक्तव्या । यदि सा सम्पद्

निश्शेषं त्यजन्ति तर्हि आधुनिकाः प्राकृताः भवेयुः । अतः विद्याभ्यासे आध्यात्मिकतायाः प्रामुख्यं यथार्हं देयम् । ताः अस्मान् समाश्वसन्ति विषमे व्यसने च ।

अस्माकं पन्थानं स्रष्टुं अस्मान् विना अन्यः कः शक्नोति । तस्मात् सर्वव्याप्तां तामनन्तशक्तिं विश्वसिमः ।

नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः
न चैनं क्लेदयन्त्यापो न शोषयति मारुतः [34]।।

अस्त्रशस्त्रैः अभेद्यं अग्निना अदाह्यं, जलेन अद्राव्यं, वायुना अशोष्यं च किञ्चिद्शक्तिविशेषः अस्मासु सन्तिष्ठते । अन्धकारसमावृतमिदं लोकं प्रदीपयेदिति प्रतीक्षामहे वयम् ।

मायाप्रपञ्चस्य मिथ्याज्ञाने संभ्रान्ताः वेदान्तविमर्शिनः युक्तिवादिनः मरणमित्यस्य प्रापञ्चिकरहस्यस्य समाधानं वदेयुः । मरणेन सह यदि सर्वं प्रणश्यति तर्हि पुनर्भवः कथमिति, पुनर्जन्म नास्तीति विवदन्ते तर्हि तस्य प्रामाणिकता च स्पष्टीकरणीया । जननमस्ति तर्हि मरणं भविष्यतीति विवदन्तः कस्मात् मरणं अस्ति तर्हि जननमपि नूनं भविष्यतीति न चिन्तयन्ति।

[34]Bhagavad Gita(ii.3)

प्रपञ्च इत्युक्तौ बोधवस्तुनः अनुभवो भवति । इयं बोधसत्ता कथं नामावशेषं भवति । सर्वेषामपि वस्तूनां कार्यकारणसम्बन्धः भवति तर्हि मरणमपि जननेन सह सम्बद्ध्यते, तस्य कारणमपि भविष्यति । अहङ्कारमपनीय विनयकारुण्यस्नेहादीनां सरणिं प्रदर्शयन्ति वेदोपनिषदः ।

........✷♦✷........

## चतुर्दशः अध्यायः

# प्रमुखोपनिषन्मन्त्राः

### ईशावास्योपनिषत्

चराचरस्वरूपेण ईश्वरः प्रपञ्चं व्याप्नोति । ईश्वरचिन्तया इदं जीवनं जय । अतिलोभः परधनासक्तिश्च पापमेव । स्वीयकर्माणि अनुष्ठय सम्पूर्णजीवन यापयेद् । परब्रह्म मनोप्यतिसत्वरः, सर्वज्ञानी च भवति । सर्वेषु परमात्मानं, परमात्मनि सर्वप्राणिनश्चानुपश्येत् ।

यस्तु सर्वाणि भूतानि आत्मन्येवानुपश्यति
सर्वभूतेषु चात्मानं तदा न विजुगुप्सते ।।

आत्मा सर्वव्यापी तेजोमयः अशरीरि, अनश्वरः, सर्वज्ञः, स्वयंभूः च अस्ति ।

स पर्यगाच्छुक्रमकायमव्रणं
अस्नाविरं शुद्धमपापविद्धं
कविर्मनीषी परिभूः स्वयम्भूः यथा
तथ्यतोऽर्थान् व्यदधात्शश्वतीभ्यः समाभ्यः ।।

सत्यं मायाप्रपञ्चं दर्शयन् मिथ्यावस्तुभिः सततं आवृतं भवति । कर्मणः माहात्म्यं, मोक्षप्राप्तिः, समदर्शित्वं, अन्ये जनाः कथं समदर्शिभिः प्रभिद्यन्ते, सकामनिष्कामोपासनाः च अत्रत्य विषयाः भवन्ति । मां सत्पथं नय, दुर्वृत्तीणां

फलमपनय, क्लान्तः अहं त्वां नमस्करतुं अशक्तः पुनः पुनः वाग्भिरीडे । इत्येकस्य ऋषेः जीवानान्त्यस्य उदात्तचिन्तोद्दीपकवचोभिः च सुशोभिता इयमुपनिषद् ।

## केनोपनिषत्

कस्य प्रेरणया मनः विषयेषु आपतति कस्य वा प्रेरणया मनः विषयासक्तं भवति ? कस्य वा नियोगेन प्राणः विचलति ? कस्य देवस्य नियोगेन वाचः उद्गिरन्ति ? कः देवः इदं श्रोत्रं नेत्रं च नियुनक्ति ?

केनोषितं पततिं प्रेषितं मनः
केन प्राणः प्रथमः प्रैति युक्तः।
केनोषितां वाचमिमां वदन्ति
चक्षुः श्रोत्रं क उ देवो युनक्ति ।।

तपः इन्द्रियनिग्रहः, कर्मेत्यादयः विद्यायाः पादानि भवन्ति । वेदाः अङ्गानि सत्मासनं च भवति । तस्यै तपो दमः कर्मेति प्रतिष्ठा, वेदाः सर्वाङ्गानि सत्यमायतनम् ।

शरीरे इन्द्रियाणां प्रवर्तनं, तस्य कारणं, ब्रह्मज्ञानप्राप्तिः, मनसः विषयासक्तिः इत्यादिकार्याणि अस्यामुपनिषदि प्रस्तुवन्ति । मनुष्यस्य आन्तरिकनियमसम्बन्धिन्यः बह्व्यः कथावर्णनाः दृश्यन्ते । मनुष्यस्य

बुद्धिप्रणाशकहेतोः अहङ्कारान्धकारस्य निवारणाय उत्तमनिदर्शनानि दीयन्तेत्र। अनेन पूर्णब्रह्मज्ञानप्राप्तिः नाम अत्यन्तं क्लिष्टा, दुरत्यया, सामान्यजनेभ्यः अप्राप्या च वर्तते इति ज्ञायते । परन्तु असाधारणत्वं कथं सिद्ध्यतीति च वक्तीयं उपनिषद् ।

### कठोपनिषत्

स्वर्गप्राप्तिजफलकमग्निमधिकृत्य तथा श्रुतिस्मृत्याचार्याणां सारमवगम्य अग्निमिमं य उपासीत स्वर्गप्राप्तिः भवेत् । अत्र नचिकेतसः तीव्रेच्छया यमः तस्मै आत्मज्ञानं उपदिदेश। अज्ञानिनः पण्डितम्मन्याश्च अन्धेन नीयमानाः अन्धाः इव परिभ्रमन्ति ।

अविद्यायामन्तरे वर्तमानाः स्वयंधीराः पण्डितम्मन्यमानाः
दद्रम्यमाणाः परियन्ति मूढाः अन्धेनैव नीयमाना यथान्धाः ।।

तादृशाः संसारं केवलं जानन्ति । पुनः पुनः संसारचक्रे निपतन्ति ।

न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहनमूढः
अयं लोको नास्ति पर इति मानी पुनः पुनः वशमापद्यते मे ।।

ईश्वरंसाक्षात्कृतवान् कश्चिदेव आत्मतत्त्वोपदेशाय योग्यः । एतच्च तर्कयुक्तिभिः प्रामाणीकर्तुं न शक्यते । यतः इदं अतिसूक्ष्मं वर्तते ।

न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः
अनन्यप्रोक्ते गतिरत्र नास्त्यणीयान् ह्यतर्क्यमणुप्रमाणात् ।।

अदृश्यं अनादिनिधनं, रागादिसङ्कुले हृदये गुप्तं, विकारैः व्यवच्छिन्नं , परमानन्दिनमन्तर्यामिनं आध्यात्मयोगानुष्ठानेन साक्षात्कृत्य विवेकी सुखदुःखातीतः जायते ।

तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं
अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति ।

उत्पत्तिनाशरहितः आत्मा शरीरनाशेऽपि अविनश्यन् तिष्ठति ।

न जायते म्रियते वा विपश्चि-
न्नायं कुतश्चिन्न बभूव कश्चिद्
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे ।।

स आत्मा अणोरप्यणीयान् स्थूलादपि स्थूलतरश्च भवति ।

अणोरणीयान् महतो महीया-
नात्मास्य जन्तोर्निहितो गुहायाम्

पापकर्मेभ्यः यः व्यतिचलन्ति, अजितेन्द्रियः, अशान्तचित्तः एषां कृते ज्ञानप्राप्तिर्भवति चेदपि आत्मसाक्षात्कारो न भवितुमर्हति ।

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः
नाशान्तमनसो वापि प्रज्ञानेनैनमाप्नुयात् ।

इमं शरीरं रथवत् आत्मानं रथिवत् बुद्धिं सारथिवत् मनः प्रग्रहवत् इन्द्रियाणि अश्ववत् विषयान् मार्गवच्च पश्यन्ति ज्ञानिनः

आत्मानं रथिनं विद्धि शरीरं रथमेव च
बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च ॥
इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् ।
आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः ॥

अविवेकी असंस्कृतचित्तः अशुद्धहृदयश्च जननमरणचक्रे पतति ।

यस्त्वविज्ञानवान् भवत्यमनस्कः सदाशुचिः
न स तत् पथमाप्नोति संसारं चाधिगच्छति ।।

इन्द्रियेभ्यः विषयः, विषयेभ्यः मनः, मनसः बुद्धिः, बुद्धेः महा आत्मा च श्रेष्ठः। महतः मूलप्रकृतिः मूलप्रकृतेः परमात्मा च श्रेष्ठा वर्तते । ततः परं किमपि नास्ति।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः।।
महतः परमव्यक्तं अव्यक्तात् पुरुषः परः ।
पुरुषान्न परं किञ्चिद् सा काष्ठा सा परा गतिः ।।

उत्कृष्टफलसिद्धिमुद्दिश्य यदा वाजस्रवसा विश्वजिन्नामकः यागः कृतः तदा सः मानुषिकचिन्ताशून्यं स्वार्थचिन्तासु निमग्नो भवति । अत्र यागानन्तरं करणीयां दानप्रक्रियायां जराबाधिता निर्गुणा धेनू अदात् सः इति कार्यं अविकसितानां मनसि यदृच्छया उत्पन्नानां विकाराणां अङ्कुरणमेवं स्यात् इति समर्थयितुं योग्यमुदाहरणं भवति । परं यमसमीपं दृढव्यवसायी नचिकेतः स्वस्य अभिलाषनिवृत्तिं करोति इत्येतत् कार्यं यस्यकस्यापि विमर्शकस्य मनसि मृदु स्पृशति । अनित्यवस्तुद्वारा नित्यवस्तु कथं प्राप्यते इति प्रश्नस्य समाधानं ददातीयं उपनिषत् । अविज्ञाः आचार्याद् कथमपि ज्ञानं सम्पादयितुं न शक्यमिति कालिकप्रसक्तं वीक्षणं यमः दर्शयति । पावनं मनः, मनो नियन्त्रणं, आत्ममनःसंयमनं, नितान्तपरिश्रमः, तीव्राभिलाषः इत्यादिकं साधकं पूरयति इयमुपनिषद् ।

**प्रश्नोपनिषत् ।**

येन मनःसङ्कल्पेन आत्मा देहं त्यजति तेन सङ्कल्पेन सहितं तत् प्राणैर्सह युनक्ति । सः प्राणः तेजःस्वरूपस्य जीवात्मनः सङ्कल्पानुसारं विभिन्नयोनिषु जन्म लभते ।

“यच्चित्तस्तेनैषा प्राणमायाति, प्राणस्तेजसा युक्तः सहात्मना यथा सङ्कल्पितं लोकं नयति” ।

शरीरान्तर्निवासी षोडशकलासहितः पुरुषः एव प्राणः श्रद्धा, आकाशादिभूतानि, इन्द्रियाणि, अन्नं, वीर्यं, पश्चात्, तपः, मन्त्रं, लोकं ,नामानि च अवासृजत् ।

“स प्राणमसृजत, प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनः अन्नमन्ना- द्वीर्यं तपो मन्त्राः कर्म लोकाः लोकेषु च नाम च” ।।

अतिगहनानि सृष्टिरहस्यान्यत्रोक्तानि । सूर्याचन्द्रमसौ अन्येग्रहाः च कथमजायन्त, तेषां उद्भवः इत्यादिकसर्वमत्र प्रतिपाद्यते । एवमेव सर्वव्यापिनी बोधसत्ता दार्शनिकरीत्या अत्यन्तं सूक्ष्मतया मनोहारितया च प्रश्नोत्तररूपेण प्रस्तुता विद्यते । आत्मनः अस्तित्वं प्राणाः, प्राणानां शरीरोष्मणां च नियन्ता कः, देहवियोगे जीवन्मुक्तिः, सुषुप्त्यां किं सम्भवति, किं नाम स्वप्नावस्था, आत्मनः परलोकगमनं, पुरुषस्य षोडशकलाः इत्यादिकाः सर्वे प्रश्नोपनिषदः विषयाः भवन्ति ।

**मुण्डकोपनिषत्**

परापरविद्याः अधिकृत्य विचार्यतेऽत्र । परमात्मा यदा साक्षात्क्रियते हृदयस्य हृदयग्रन्थिर्विच्छिद्यते । सर्वसंशयाः अपवार्यन्ते ।

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।

क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे ।।

सूर्यचन्द्रतारकादिकं परब्रह्मणा सुशोभते ।

न तत्र सूर्यो भाति न चन्द्रतारकं ।
नेमाः विद्युतो भान्ति कुतोऽयमग्निः।।
तमेव भान्तमनुभाति सर्वं ।
तस्य भासा सर्वमिदं विभाति ।।

जीवात्मा एकस्मिन्नेव शरीरे देहेन्द्रियैः सह तादात्म्यं प्राप्य अस्वतन्त्रतया दुःखमनुभवति इत्यपि उपनिषदियं वदति । आध्यात्मिकतत्त्वयुक्ता पराविद्या भौतिकज्ञानयुक्तापरापरविद्याः कर्मणां प्रसक्तिः, यागादिकर्माणि, कर्मणां फलं, क्षयं, सर्वज्ञानप्राप्तिरूपात्मज्ञाननिष्ठगुरुशिष्यबन्धः, विद्याभ्यासश्च अस्य सविशेषताः भवन्ति । कर्माणि कथं जीवं नयन्ति, जननमरणचक्रगतेः कारणं, इदं कथं निवर्तनीयं, मनुष्याणां इच्छा, अध्यापनस्य अनर्थकता, श्रवणमनननिदिध्यासनानि वेदशास्त्रपठनस्य आवश्यकताः, समकालिकप्रकृतिः, अन्नस्य प्राधान्यं, तस्योद्भवः एतत्सर्वं विद्या भवति सर्वसुखहेतुः इति च अस्यामुपनिषदि प्रस्तूयन्ते ।

**माण्डूक्योपनिषत्**

आत्मा नाम विश्वः, तैजसः, प्राज्ञः, तुरीयः, इति चतुर्भिः पादैः युक्तो भवति । गाढनिद्रायामात्मा आनन्दस्वरूपो भूत्वा परमात्मनि लीयते ।

सर्वं ह्येतद् ब्रह्म ।। अयमात्मा ब्रह्मा ।। सोयमात्मा चतुष्पाद् ।।

दशोपनिषत्सु लघुतमेयं उपनिषद् चेदपि अन्तर्ज्ञानेषु आश्चर्यसंयुतप्रयाणैः मनुष्याणां मनः अबोधमनः, उपबोधमनः, इत्याद्यदृश्यमेखलाः अत्र निगूढाः वर्तन्ते । संसारस्य सर्वाण्यपि शास्त्राणि अस्याः पुरतः विनम्राणि तिष्ठन्ति । तादृग्विषयाः चर्च्यन्तेत्र । जाग्रत्स्वप्नसुषुप्त्यवस्थाभिर्विना तुरीयावस्थायाः गरिमापि अत्रैव द्रष्टुं शक्या ।

इन्द्रियाणि अस्मभ्यं उदात्तमेव दर्शयन्तु , त्यागिनो वयं सद्वृत्ताः, ईश्वरोपासिनश्च भूत्वा देवविहितायुष्मन्तः च भवेम इति महद्वीक्षणमपि अत्रैव सन्निबद्धं दृश्यते । आत्मनः स्थूलरूपं भवति भौतिकविषयान् भुञ्जानः वैश्वानरो नाम प्रथमः पादः। सूक्ष्मान् बाह्यविषयान् भुञ्जानः तैजसः इति द्वितीयपादः, प्रज्ञानघनरूपेण अन्तःप्रज्ञवत् वर्तमानः प्राज्ञो नाम तृतीयःपादः, अचिन्त्यमग्राह्यं, विवरणातीतं, सर्वसत्यसारं, अद्वैतं च भवति आत्मा । तस्य तुरीयाख्यः चतुर्थश्च पादः इत्युक्त्वा प्रणवमन्त्रैः कथं परमात्मनि लीयते इत्यपि विव्रियते माण्डूक्योपनिषदि। ऊँकारस्य अकार उकार मकारमात्राः तद्वद् वैश्वानरस्य तैजसप्राज्ञप्रभेदावपि अनायासेनोद्बोधयति इयम् ।

## तैत्तिरीयोपनिषत्

सदाचारपालनस्य शास्त्राध्ययनस्य ऋतसम्भाषणस्य च महत्त्वमुद्घुष्यतेस्याम् उपनिषदि । यस्मात् वाङ्मनसी अप्राप्यवत् प्रत्यायाति तच्च ब्रह्मानन्दं येन ज्ञायते सः कदापि केभ्यश्चिदपि न त्रसते ।

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह आनन्दंब्रह्मणो विद्वान् न बिभेति कदाचन। शिक्षावल्ली, ब्रह्मानन्दवल्ली, भृगुवल्ली इत्येतैः अध्यायैः वेदोपासना, वेदपाठसारः, ऊँकारमहत्त्वं, अनेकविधानि प्रार्थनामन्त्राणि, अन्तरिक्षस्वर्लोकविवरणानि, ब्रह्मचारिभिरनुष्ठेयाः आचारविधयः, वेदज्ञानिनः गुरोः दायित्वानि पुरुषेण अवश्यं कार्याः धर्माः, पञ्चकोशानां विवरणानि, ब्रह्मचारिभिरनुष्ठेयाः आचारविधयः, ब्रह्मस्वरूपं, ब्रह्मज्ञानं, ब्रह्मज्ञानावाप्तये स्वीकार्याः मार्गाः, अन्नमाहात्म्यं, प्राणः, मनः, विज्ञानमित्यादिबह्वः विषयाः सुष्ठु प्रतिपादिताः। सत्यपरकाणि सद्वीक्षणानि, योगानुष्ठानानि च कस्यचिद् जीवने कति परिवर्तनानि आपादयन्ति इत्यपि उच्यते ।

वस्तुतया मानसिकबौद्धिकात्मीयस्वातन्त्र्यम् उपनिषद्भिः विभाव्यते इति उद्बोधयति तैत्तिरीयोपनिषद् । ज्ञानविज्ञाने कथं प्रभिद्यते, ज्ञानी कश्चन सदा निरहङ्कारी च भवति, ततोपि चमत्कारपूर्णो भवति विज्ञानस्याध्वरः इति च यदा उपनिषदः अस्मान् अवबोधयन्ति तथापि स्वेच्छानुसारं जीवनं यापयितुमपि कोपि निषेधः न विधीयते आभिः । परन्तु तत्तद्कर्मफलानि जन्मजन्मान्तरेषु अस्माननुचरन्तीति तत्थ्यमपि प्रतिफलन्ति प्रत्येकोपनिषद्सु अपि ।

येन दृश्यन्ते, श्रूयन्ते, उच्यन्ते, जिघ्यन्ते स एवात्मा । प्रज्ञानस्याभिधान्तराणि बहुधा दृश्यन्ते । तानि च इत्थं - चेतना , आज्ञाशक्तिः, विज्ञानं, प्रज्ञानं, धारणाशक्तिः, धैर्यं, विचारशक्तिः, विचारस्वातन्त्र्यं, धारणाशक्तिः कल्पनाशक्तिः, निश्चयदार्ढ्यं, जीवनशक्तिः, इच्छा, विषयासक्तिश्च ।

“कोयमात्मेति वयमुपास्महे । कतरः स आत्मा येन वा पश्यति येन वा शृणोति, येन वा गन्धानाजिघ्रति, येन वा वाचं व्याकरोति, येन वा स्वादु चासादु च विजानाति यदेतद् हृदयं मनश्चैतद् संज्ञानमाज्ञानं प्रज्ञानं विज्ञानं मेधादृष्टिर्धृतिर्मनीषाजूतिः स्मृतिः सङ्कल्पः क्रतूरसूः कामो वश” इति सर्वाण्यैवेतानि प्रज्ञानस्य नामधेयानि भवन्ति ।

अस्यां हि अध्यारोपः, अपवादः, आत्मनि प्रपञ्चदर्शनं, एकत्वदर्शनं इत्यादि प्रमुखसिद्धान्ताः, अस्माभिर्ज्ञेयं अध्यात्मज्ञानं, तस्य पूर्तिः, व्यावहारिकज्ञानं, कथं प्रारम्भः ततश्च तस्य क्रमानुगतवर्तनमित्यादि कार्याणि प्रतिपाद्यन्ति अनयोपनिषदा । एवमेव श्रेष्ठज्ञानसिद्ध्यर्थं चिकीर्षवः इच्छावन्तः वीर्यवन्तश्च स्युः । तादृशानां वाङ्मनसी युगपत् प्रवर्तेताम् इति मन्त्रेण सहैव अस्याः प्रारम्भः क्रियते । लौकिकज्ञानसिद्धं कञ्चिद् क्रमशः तस्य तत्कालिकमनोमण्डलात् समुन्नीय वास्तविकदर्शनं प्रापयति माण्डूक्योपनिषत् ।

एकः स्वस्य इच्छां सततं ध्यायन् स्तुवन् यदा वर्तते तदा सा इच्छा तमुपगम्य ऋद्धिमातनोति ।

“आत्मानमन्ततः उपसृत्य स्तुवीत कामं ध्यायन्न प्रमत्तोभ्याशो ह यदस्मै सकामः  समृद्ध्येत यत्कामः स्तुवीतेति यत् कामः स्तुवीतेति” ।।

सर्वमिदं ब्रह्मैव । सर्वं तस्मिन् उपसृज्य स्थितिं कृत्वा तस्मिन्नेव प्रलीयते ।

सर्वं खल्विदं ब्रह्म तज्जलानीति शान्त उपासीत, अथ खलु क्रतुमयः पुरुषो यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः  प्रेत्य भवति स कतुं कुर्वीत ।

सत्यदर्शी कदापि मृत्योर्वा आमयाद्वा न बिभेति । न पश्यति स पुरतः । सः सर्वमपि समानरीत्या प्राप्नोति ।

न पश्यो मृत्युं पश्यति न रोगं नोत दुःखतां
सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः ।।

ध्यानोपासनयोः श्रेष्ठता तद् द्वारा ब्रह्मात्मानौ अवाप्तुमुपायः अद्वैतबोधः , जीवनस्य निष्फलता, साक्षात्काराः च अत्रैव प्रस्तूयन्ते । जीवनं परिपावनं सार्थकञ्च कर्तुमुपायाः उपदिश्यन्ते । शान्तिं सन्दधानस्य अद्वैतमिति ज्ञानस्य परमकाष्ठामवाप्तुञ्च मार्गाः दीयन्ते । युगपदेव द्वैतोपाधयः

उपासनाराधनाविधयश्च नूनं करणीयाः तथैव मनसः स्वच्छतायै एषां आवश्यकताश्च विवृणोति छान्दोग्यम्। ऋषयोपि प्राकृतिकघटकाः उपयुज्य एव परमपदं साक्षात्कुर्वन्ति ।

श्वेतकेतोः सत्यकामजाबालयोश्च कथाः पुरुषं आध्यात्मिकसमुन्नतिं प्रापयति । कियन्तः मानविकदर्शनानि पर्यालोचयति अत्र । सत्यभाषणे धीरता, दीनतायां जीवद्भ्यः प्रदातुं जागरणशक्तिः, अज्ञानतिमिरबाधितस्य नेत्रे प्रकाशेन समुन्मीलयितुं मार्गाः, समेषां सुखदुःखानि तत्तेषां कर्मानुसारं भवतीति महद्वीक्षणं, प्राणाहारचिन्तावृत्तिषु अतीवश्रद्धा देया इत्यादीनि बहूनि कार्याणि समुद्बोधयति छान्दोग्योपनिषद् । वेदप्रसूनेभ्यः यथा ऋग्भ्रमराः मधु स्वांशीकरोति तथाउपनिषदोपि ताः उपागच्छन्ति । पुरुषाय मधुरूपमन्नं तेजश्शक्तिरारोग्यसमीक्षणादीनि प्रयच्छन्ति । आत्मज्ञानस्य अधिकारी स एव । सर्वं ज्ञातुं लब्धुं च शक्नोति सः इत्येतदपि अत्र बोधयति । अत्रैव तत्त्वमसीति महावाक्यस्य प्रारभ्यः।

## बृहदारण्यकोपनिषत्

आध्यात्मिकशरीरस्य तेजोमयः अमृतमयश्च पुरुषः आत्मैवेति बृहदारण्यकोपनिषदपि निगदति ।

"अयमात्मा इदं अमृतमिदं ब्रह्म इदं सर्वम्" ।।

मनः यस्मिन् अत्यन्तं कामयते तदेव प्राप्नोति पुरुषः ।

तदेव सक्तः सह कर्मणैति लिङ्गं मनो यत्र निषक्तमस्य
प्राप्यन्तं कर्मणस्तस्य यत् किञ्चेह करोत्ययं
तस्माल्लोकात् पुनरैति अस्मै लोकाय कर्मणे।।

सत्यस्य ब्रह्मणः मुखं सुवर्णपात्रेण पिहितमिति प्रथितश्लोकोपि अत्रैव मिलति।

"हिरम्मयेन पात्रेण सत्यस्यापिहितं मुखं" ।।

पौराणिकतया, विषयस्य गहनत्वेन, गीरम्णा आख्यानरीत्या च महत्प्राधान्य मर्हति इयमुपनिषद् । अस्याः उपनिषदः उपदेशोपपत्तिरुपासनानि मधुकाण्डं, मुनिकाण्डं, खिलकाण्डमिति त्रिभिर्काण्डैः विशदीक्रियन्ते।

आत्मप्रज्ञानां सुविदितं अहं ब्रह्मास्मि, असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मा अमृतं गमय, अभयं वै ब्रह्म, आत्मनस्तु कामाय, सर्वं प्रियं भवति, विज्ञानमरे केन विजानीयात्, आत्मैवेदमग्र आसीदेकमेव, आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इत्यादीनि श्रद्धेयानि वाक्यानि बृहदारण्यकस्य मूल्यवन्मन्त्रां भवन्ति । कर्मणां फलं, अविद्यानाशः कथं सम्भवति, सत्यसाक्षात्कारः किं, कथञ्चेत्यादिकमत्र प्रस्तूयते । "अहं ब्रह्मास्मी" इति महावाक्यं, एकत्वभावनोद्दीपकमन्त्राणि, सप्तान्नानामानि, देहत्यागात्परं आत्मनः गतिः, व्यावहारिकसत्यात् पारमार्थिकसत्यं प्रति उन्नयनम्, जाग्रत्स्वप्नसुषुप्त्यवस्थासु आत्मनः सञ्चलनं, सुषुप्तौ अद्वैतबोधस्य हेतुः, समाधिसुषुप्त्यन्तरम्, वैराग्यसिद्धिमार्गाः, मोक्षप्राप्तिः, दमः, दानं, दया इति त्रयोगुणाः, च बृहदारण्यके प्रतिपाद्यविषयाः भवन्ति।

एतदतिरिच्य गायत्रीमन्त्रस्य त्रयः पादाः, शरीरे प्राणानां प्राधान्यं, संसारस्य निस्सारवत्त्वं च अत्र ईर्यते । उत्तमभावनाभिः आत्मज्ञानस्य परकोटिं दर्शयतीयमुपनिषत् ।

"पुण्येन कर्मणा पुण्यं भवति वै पापेन पापः" ।।

इति मन्त्रेण अत्रास्माकं कर्मफलं अनुस्मारयति ।

अन्धं तमः प्रविशन्ति योविद्यामुपासते
ततो भूयः इव ते तमो य उ विद्यायां रताः ।।

अज्ञातजन्यानि कर्माणि य उपास्ते सः घोरान्धकारे पतति । सगुणोपासनारताः जनाः ततोपि घनान्धकारे निमज्जन्ति । तथैव पुनरावृत्तिरहितदेवयानं पुनर्जन्महेतुं पितृयानञ्चोक्त्वा आत्मनः परलोकगतिं अपि वर्णयति ।

........✷♦✷........

पञ्चदशः अध्यायः

# कतिपयशिक्षणवीक्षणानि

रङ्गनाथस्वामिना एवमुच्यते यत् प्राचीनभारतस्य चिरस्थायिनः उपनिषद्सौधस्य प्रकृतिः, आशयः, निस्सीमता, आध्यात्मिकता इत्येषां बौद्धिकमनासक्तञ्च अध्ययनं आधुनिकेभ्यः जनेभ्यः अत्यन्तं उपकाराय भवति इति[35] । वेदोपनिषदः वैयक्तिकानि समग्राण्यपि कार्याणि अपि अस्मान् बोधयति। अस्माकं प्राग्वर्तिभिः ऋषिभिः अनुददन्ति प्रकाशस्रोतांसि भवन्ति उपनिषदः ।

न केवलमिमाः मनुष्याणामस्तित्वं अधिकृत्य अपि तु तदारोग्य संरक्षणविषयाः सुविज्ञापयन्ति ।

ऋग्वैदिकोपवेदे आयुर्वेदः अस्मान् परितो विद्यमानाः वृक्षलतादयः तेषां औषधफलानि चाधिकृत्य सविस्तरं प्रतिपादयति । प्रत्येकोपि छात्रः स्वगृहान्तरिक्षात् तथा तस्य इतरव्यावहारिकमेखलाभ्यश्च बहुविधज्ञानानि समार्जयति । तथापि तस्य प्रान्तप्रदेशेषु व्याप्तस्य जैवसान्निध्यस्य विषये न किमपि जानाति सः ।

[35]Marunna samuhathinu avasyamaya sasvatamulyangal.Vol.I,page.40

आयुषः वेदः आयुर्वेदः । तस्य महासागरस्य स्वल्पोपि अंशः अवश्यं ज्ञेयः । यतो हि वैद्यशास्त्रे आयुर्वेदः महत्प्राधान्यमर्हति । चरकसुश्रुतसंहितादयः आरोग्यसंरक्षणमधिकृत्य विपुलं ज्ञानमस्मभ्यं प्रयच्छन्ति । एकैकोपि प्रकृत्यनुगुणभोजनं स्वीकुर्यात् । जीवनशैल्यः सेवनीयौषधाः च प्रकृत्यनुसृता एव भवेयुरिति निष्कर्षः तावत्प्राधान्येन हि अस्माकं जीवनं अग्रे नेतव्यमिति एतदस्मान् बोधयति । कालानां ऋतुभेदानाञ्चानुसारं अस्माभिः अनुवर्तनीयाः दिनचर्याः ऋतुचर्याश्च आदिशति आयुर्वेदः ।

शरीरस्य परिवर्तनानि कथमनुपश्येयुः तथा फलमूलशाकधान्य तैलाहारादीनां उपयोगक्रमः जीवने तेषां अपेक्षतानपेक्षताः एषां शारीरिकप्रभावः प्रभृति अनेके विषयाः प्रस्तूयन्ते उपवेदेस्मिन् ।

गृहाङ्कणेषु सर्वं उपवननिर्माणाय निष्पाटितानि कति सस्यानि आरोग्यप्रदायकानि रोगापहानि च भवेयुः । महारोगप्रशमनाः सस्यलतादयः अस्मान् परितः परिलसन्ति । किं बहुना दशपुष्पेषु सर्वमपि अस्मासु जायमानलघुव्याधयः अपि प्रशमयति । आर्यनिम्बकृष्णनिम्बतुलस्यादयः औषधसस्यानि अस्माकं बान्धवसदृशाः इति बाल्यादारभ्यैव जानीयुः छात्राः। प्राथमिकस्तरादेव आयुर्वेदशिक्षणं यदि क्रियते तर्हि महते लाभाय भवेत् । तद्वत् प्रार्थनायाः अपि पाठ्यपद्धतौ यथार्हं स्थानं देयम् ।

छात्रेषु सर्वविद्याः अतिरिच्य ईश्वरविश्वासः प्रथमं संरचनीयः । अस्माकं समेषामपि कर्मणां साक्षिभूतः ईश्वरो नाम काचिद् शक्तिः वर्तते इति पूर्वज्ञानं पापकर्मेभ्यः अवश्यं तं निवारयेत् । परन्तु ईश्वरस्य नामश्रवणमात्रे एव अवगणनामनोभावेन व्यवहरन्तः छात्राः पापेभ्यः न निवर्तन्ते तर्हि तत्र विस्मयो न कर्तव्यः ।

प्रपञ्चस्य दृश्यादृश्यानि सकलान्यपि ज्ञानबोधानि समुद्भावयितुं उपनिषदः साहाय्यं कुर्वन्ति । उपर्युक्तोपनिषदां बहवः प्रभेदाः दृश्यन्ते । ते च ईशकेनादयः दशोपनिषदः, अष्टोत्तरशतमिताः इतरोपनिषदः, शैव वैष्णव शाक्तेयोपनिषदः च भवन्ति । केवलज्ञानादारभ्य तत्वज्ञानस्य अत्युच्चकोटिं दर्शयन्ति अष्टोत्तरशतोपनिषदः अपि । वेदाधिष्ठिताः उपनिषदः तत्तद् ऋषिभ्यः ज्ञानोदयेन निष्पन्नाः स्युः। ताश्च आध्यात्मिकाधिभौतिकाधिदैविकदुःखनिवृत्तिं काङ्क्षन्ति च ।

ब्रह्माण्डोत्पत्तिः, जीवोत्पत्तिः, पञ्चेन्द्रियाणां प्राणानां च समुद्भवः, शरीराहारसृष्टिः, गर्भस्थशिशुः, स्वर्गप्राप्तिः, ब्रह्मलोकः, क्रतूनामपेक्षता, ऊँकारनिरूपणम्, आत्मबुद्धिमनांसि जीवपुनर्जन्मयोगक्षेमादयः विचार्यन्ते ऋग्वेदसम्बन्धिनीषूपनिषत्सु ।

अष्टमालिकाविवरणं, देव्युपासाविचाराः, नानाचारक्रमाः, कर्मणः वैशिष्ट्यं, एकत्वदर्शनं, प्रपञ्चसत्यं, जपकर्माणि, संसारदुःखानि, मानवसृष्टिः,

सत्यमहत्त्वं, पुनर्जननं, गर्भाधानं, योगिलक्षणं, पञ्चभूतानि, आध्यात्मिकतत्वानि, नानालोकाः, मृत्युविवरणं, जाग्रदादयोऽवस्थाः, अतीन्द्रियध्यानविषयाः, एकाग्रता, पञ्चकोशाः, महावाक्यानि, अनेकप्रकारकाणि आत्मतत्वानि, ज्ञानकर्मभक्तिमार्गाः, ब्रह्मलोकप्रयाणं, कुण्डलिनीशक्तिः, कायविज्ञानं, मनोनियन्त्रणं, ब्रह्मविद्या मनसः विषयासक्तिः, माया, अज्ञानं, आत्मज्ञानं, जीवस्य देहत्यागः, परापराविद्याः इत्यादि बहुप्रकारकाः विषयाः आनन्त्येन सन्निवेशयन्ति उपनिषत्सु ।

आत्मनियन्त्रणमर्थाः एव अद्यतनछात्राः। अज्ञानमेवास्य दोषस्य मुख्यहेतुः, प्रायशः बौद्धिकव्यापारेषु अतत्पराः छात्राः एव अकरमासक्ताः भवेयुः। अद्यत्वे सर्वकलाशालाभ्यः स्वयंभरणाधिकारः प्रदत्तः अस्ति । किन्त्वस्य आविष्कर्तृभिः पुरःस्थापिताशयाः विकासांश्च न कदापि कर्मपथमागच्छन्ति । एवमेव एतस्य नयस्य पूर्वकालचरितं पश्यामस्तर्हि इमे कलालयाः शुष्कमूल्यैः साकं राष्ट्रियकुतन्त्राणां प्रभवस्थानत्वेन परिवर्तमानाः भवेयुः ।

शिक्षणपद्धतेः परिष्कर्तारः पापकर्मणां गतिनिर्णेतारः सञ्जाताः । बिरुद बिरुदानन्तरबिरुद धारिणः छात्राः बौद्धिकसांस्कारिकमण्डलेषु मन्दतामुपयान्ति । न कश्चिदपि राज्यसंरक्षणे वा जनसंरक्षणमेखलासु वा भागं गृह्णाति। युवानः भूयांसोऽपि जङ्गमदूरवाण्याः सङ्गणकयन्त्रस्य च मायाप्रपञ्चे अटन्तः सन्तः वैदेशिकानां जीवनचर्याः अनुकृत्य जीवनं यापयन्ति क्षपयन्ति च। नाटकरचना, अवतारणं, इतरकलासाहित्यप्रवर्तनानि, अपरिचितमेखलाः

अभूवन् । तस्मादवश्यमस्याः समस्यायाः प्रतिविधिमार्गाः चिन्तनीयाः भवन्ति। केपि न पुनर्जन्मसिद्धान्ताः नापवारणीयाः । यत्कर्म क्रियते पुरुषेण तस्य फलं भोक्तुं सः नूनं जन्मान्तरं प्राप्नुयात् ।

सिद्धिमन्तः धिषणाशालिनः जनाः उत्तममुद्योगं, वेतनसंवर्धनं च प्रतीक्ष्य भारतात् बहिर्गच्छन्ति । अचेतनपरिष्कारान् परित्यज्य अस्माकं शिक्षणप्रणालिं गरिष्टं कर्तुं एवं शिक्षितजनानां उद्योगप्राप्तये अमोघजीवनाय च नूतनमेकां सरणिं संरचयेत् । आधुनिकशिक्षणच्युतये अन्यदेकं कारणं भवति अतत्त्वदीक्षात्मककलालयराष्ट्रियता । कलालयराष्ट्रियेण विनैव अध्येतारः राष्ट्रमीमांसां एच्छिकविषयत्वेन स्वीकृत्य राष्ट्रसेवकाः भवितुमर्हन्ति । एवं सति कलालयराष्ट्रियतां प्रचोद्य कपटराष्ट्रियवादिनां आज्ञानुवर्तिनः कुर्वन्ति इतरे । सर्वकारीयकलालयेषु छात्रसमरहेतोः विहाय कति अध्ययनदिनानि मिलन्ति ? अद्यैतत् सर्वमपि उत्सवप्रतीतिं जनयति कलालयेषु ।

अद्य कलालया अनन्तर्दशिनः शक्तिविहीनान् पौरान् सृजन्ति । केवलपरिष्कारान् आविष्कुर्वन्तः अधिकारिणः, राष्ट्रियप्रेरिताध्यापक-विद्यार्थिदलानि, हिंसोत्सुकतां सृष्ट्वा जर्जरित शिक्षणसम्प्रदायान् आराधयन्ति।

एवमेव अध्यापकेभ्यः अध्यापनादृते अन्यद्दायित्वं यदि दीयन्ते तर्हि अध्यापने मूल्यशोषणं जायेत । कश्चिद् अध्यापकः स्वस्य विज्ञानसम्पदः

प्रवर्धनमनुदिनं कुर्यात् । वाचनं, लेखनं च सः कदापि न परित्यजेत् । एतावत् पर्यन्तमपि सः तत् कुर्वाणः आसन् । परमत्र दिनपत्रिकापारायणार्थमपि स समयं न लभते । आधुना एकघण्टात्मिकतायाः निर्बन्धशिक्षणेन शैक्षणिकपद्धतिं सङ्कीर्णां कुर्वन्ति । अधिकारिणः शिक्षणसमयं विहाय कालान्तरे तान् स्वतन्त्रान् कुर्युः ।

केन्द्रीकृतशासनमथवा सम्प्रदायः सुशिक्षणाय अनिवार्यं वर्तते । तादृशः एकः अद्य विमृश्यते परिहस्यते च । व्यक्तित्वविकासाय समाजोन्नमनाय च प्रकल्पितं शिक्षणमद्य नीचानां धनलोभिनां च समाजत्वमाप्य अधोगच्छति । सुशिक्षिताःअपि जनाः धनार्जनाय कामपि निष्ठुरां वृत्तिं कर्तुमुद्यतः भवन्ति। प्रग्रहरहितः सर्वकारः, निर्विकाराः जनाश्च ईदृशीं व्यवस्थितिं यदि न परिवर्तयन्ति तर्हि क्रूराः मानवाः परस्परं व्यापादनेन स्वयं नश्येयुः । शिक्षणाय मूल्यवत् सूक्ष्मञ्चैकमासूत्रणमपेक्षितम्। तदर्थं देशीयतले एव आसूत्रणसमितयः भविष्यं विचिन्त्य सूक्ष्मेक्षणेन संघटनीयाः करणीयाः । अध्यापकविद्यार्थिराष्ट्रियं कलालयेभ्यः निष्कासनीयञ्च भवति ।

महात्मागान्धिना अकर्तव्यतया इति विभावितानि सप्तपापानि भवन्ति - अकर्मणा आर्जितं वित्तं, अनात्मनिष्ठं सुखं, अपूतं विज्ञानं, अधार्मिकवाणिज्यं, मनुष्यत्वरहितं शास्त्रं, त्यागहीनं जीवनं, अतत्त्वदीक्षात्मकराष्ट्रियता च । किन्तु तत् सर्वमपि इदानीं भारते सर्वत्र पश्यामः ।

नव्ये आगोलवत्करणनये विशिष्टः समुन्नतः, व्यक्तित्वविकासाय प्रेरकश्च विद्याभ्यासः किमस्माभिर्द्रष्टुं शक्यते ।

स्वस्य जीवनान्तरिक्षे स्थित्वैव स्वदेशाय वैयक्तिक जीवनाय च सहायकानि सासंस्कारिकमूल्यानि संरक्षितुं एतैः क्रयविक्रयणैः शक्यते वा । नास्ति चेत् प्राकृतमनुष्याः इव वयमपि किं तिरस्कृताः भवेम इति संशयोपि सार्थकः भवति । भारतीयाः वयं विदेशीयानां सम्मिश्ररूपस्वभावत्वेन विपरिणमिनो भवेम ।

भारतस्य सम्पत्तिः अस्माकं सुसम्पन्नं शैक्षणिकपारम्पर्यं तद्द्वारा राष्ट्रपुरोगतिश्च परिज्ञाय अनुभोक्तव्यमेव । अन्धविश्वासाः इति नास्तिकैः निन्दितानि एतानि आर्षवीक्षणानि आधुनिकशास्त्रकारैः साम्प्रतं नितरां श्लाघ्यते।

शास्त्रविचक्षणाः स्टीफन्होकिन्स्, हैसन्बर्ग्, एसक् न्यूटन् प्रभृतयः भारतीयपैतृकस्य शास्त्रीयतां अङ्गीकृतवन्तः आसन् । तथापि वयं अन्धयाचकाः इव याचमानाः वर्तामहे ।

सर्वदा शास्त्राणि प्रामाणिकताम् अपेक्षन्ते । विज्ञानस्य सुनिश्चितत्वादेव हि स्वस्य अनिश्चितत्वसिद्धान्तं हैसन्बर्ग् अन्विष्यति स्म । वेर्णर् हैसन्बर्ग् महोदयस्य 'अव्यूहक्काण्डं यान्त्रिक्याः' योगदाने अनिश्चितत्वसिद्धान्ते वयं पठामः यत् सब् अटोमिकलोकस्य एकार्धं वयं यदा अवगन्तुं यतामहे तदा

अपरार्धं ततोपि संशयास्पदं सञ्जायते इति । इर्विन् ष्रोडिङ्ङर् महोदयस्य 'तरङ्गयान्त्रिकी' सिद्धान्तोऽपि तत्र प्रमाणम्। मनो व्यापारमेखलां प्राणांश्चाधिकृत्य उक्त्वा अस्मान् व्यस्मापयन् ते शास्त्रकोविदाः । वैचित्र्यस्य नानात्वे वस्तुतः एकत्वमेव वर्ततेति सत्यमेव । बोधरचनायामेव वैचित्र्य सृष्टिरपि अन्तर्हितं वर्तते। सकलसमस्यानां समाधानरूपेण अयं महाशास्त्रज्ञोपि बोधसत्तायाः एकीकरणमेव लक्षीकरोति ।

अद्यतनशास्त्रज्ञाः अज्ञेयमपि अन्वेष्टुं अङ्गीकर्तुं च सिद्धाः भवन्ति। पुनः शास्त्रस्य परिमितिं ज्ञात्वा ते दृढवादान् सन्त्यजन्ति । श्रवणमात्रेणैव सत्यमिति विभाव्य अन्वेषणाय उद्यमः न क्रियेत । न चैतन्यावहां शक्तिं मनसि निधाय अल्पशः तत्सत्यमवगन्तव्यम् । तथाविधबौद्धिकसत्यज्ञानस्वरूपैः अस्माकं मनसि या प्रशान्तिरुद्पाद्यते तया सहैव अल्पमात्रमपि ज्ञानं अनावरणीयम् ।

एकस्य कणस्य गतिवेगं स्थानञ्च युगपत् निश्चेतुं न शक्नोतीति अनिश्चितत्वसिद्धान्तः प्रमाणैः स्थापयति यत्र परमाणुतः आप्रपञ्चं व्याप्तैका शक्तिः सर्वचराचराण्यपि अधिवसति इति उपनिषदः वदन्ति । स एव सिद्धान्तः योगशास्त्रेषु प्रागेवोक्तः । "एकसमये च उभयानवधारणम्" इति योगशास्त्रस्य पतञ्जलिमहर्षिणः वाचः एकस्मिन्नेव काले उभयोः बद्धस्वभावयोः व्यवच्छेदनमशक्यमिति प्रबोधयति । फ्रिट् जोफ् काप्रायाः सुप्रथिते 'द तावो

ओफ् फिसिक्स्' नामके ग्रन्थे वैदिकमात्मीयं भौतिकञ्च ज्ञानं उपस्थाप्यते । लोकस्य सुविख्याताः शास्त्रज्ञाः ईदृग्भावनाः न कदापि सङ्कल्प्यन्ति याः वेदोपनिषद्भिः सहस्राधिकवर्षेभ्यः पूर्वमेव प्रकल्पिताः आसन् । अर्पणमनोभावेन जीवित्वा एकाग्रध्यानेन अस्माकं मानवप्रज्ञा अत्युन्नतेषु स्थानेषु प्रापयितुं शक्यत इति ईश्वरस्वरूपैः ऋषीश्वरैः वयं बोधितवन्तः ।

उपनिषत्सु व्याप्ता स्थूलसूक्ष्मविभावनैव सूक्ष्मकणेषु शिवताण्डवसङ्कल्पे च(Cosmic dance) विभाविता। आधुनिकशास्त्रसिद्धान्ताः सम्पूर्णतया उपनिषद् तत्वानीति अचिरादेव अवगम्यन्ते ।

प्रपञ्चसंरचनायाः एकैकचलनमपि ईश्वराधीनमिति उपनिषदः वदन्ति । भवन्तु नाम अन्यवैदेशिकशास्त्रकाराणां संवादाः । सत्यं युक्तिभद्रं च वीक्षणं अस्माकं पुरतः एव विद्यते । एतस्मादृते न कोपि किमपि प्रमाणीकर्तुं न शक्नुयात्। उपनिषदः यदा वास्तविकं तत्त्वं ईश्वरं पुरस्कृत्य उपस्थायन्ति तत् स्वांशीकर्तुमस्माकं सन्नद्धता परमपेक्ष्यते ।

इमाः सत्यकामनाः परित्यज्य विद्यार्थिभिः कुत्रापि न गन्तव्यं भवति । तेषां सत्वसम्पादनाय अपेक्षिताः सामग्र्यः सर्वा अपि उपनिषत्सु दृढमुपनिबद्धाः सन्ति। एतद्विहाय अन्या कापि शिक्षणपद्धतिः भारते नैव दृढमूलं स्यात् । एतानि वीक्षणानि कस्यापि वर्गस्याथवा जातेः धर्मस्य न भवति । किञ्चैतद् प्रापञ्चिकं वीक्षणं भवति। धर्मजातिलिङ्गानि सर्वाण्यपि अत्रान्तर्भवन्ति । आप्रपञ्चं संस्थितं सत्यमिदं न कस्मादपि भिद्यते ।

इदं मनुष्यस्य जीवस्य ज्ञानस्य च शास्त्रं भवति । यान्त्रिकं जीवनं तदर्थं शास्त्रसाङ्केतिकलाभाश्च अनुदिनं प्रवर्धन्ते । तस्मादपि आध्यात्मिका आशयाः साध्याः । अद्यत्वे विद्यार्थिनां तथा इतरेषां च भौतिकविकासाः अनन्ताः । परन्तु एतैः निवर्तयितुमशक्याः छात्राणामनेकसमस्याः अनध्यात्मिकपर समीपनेन जायन्ते ।

व्यक्तिजीवनाय लक्ष्यं वा अर्थं वा निर्मीय दातुं भौतिकपुरोगतयः कदापि न शक्नुवन्ति इति सत्यं तं भागिकरूपेण अज्ञं भावयति । किमपि लभ्यते चेद् मानसिकाधिः तस्यान्तः भवति । मानसिकपरमार्गनिर्देशाः मनःशास्त्राणि वा किमपि अस्मात् तं मोचयितुं न शक्नुवन्ति । शास्त्राणि सर्वं शास्त्रीकर्तुं यस्य शक्तिर्वर्तते स एव अस्य परिहारं विधातुं शक्नोति । इदं यदि ईश्वरस्य तर्हि निश्चयेन तदङ्गिक्रियेत ।

परिष्कारैः वाचाटोपैः, शास्त्रसाङ्केतिकविद्याभिः वा कोपि कमपि उत्तमं कर्तुं न समर्थः । तदर्थं स्वयं चिन्तयेत् । अस्माकं विचारेण विना अस्माकमेव कार्याणि कथं प्रवृत्तिपथमानेतुं शक्यन्ते । अनुशासनैः, मार्गनिर्देशनवर्गैः निदर्शनैः वा कमपि वयं परिवर्तयितुं न शक्नुमः । कथं किं भवेयमिति व्यक्तिरेव चिन्तयेत् । इमाश्च चिन्ताः समीचीनाः स्युः । अस्माकं सत्ताप्रबोधकमन्त्राः विचाराश्च उपनिषत्सु अभिहिताः । तत्र कोपि कमपि न निर्बध्नाति । किञ्च केवलं ज्ञापयत्येव ।

विद्याभ्यासं सर्वदा श्रेष्ठजीवनाय स्यात् । पूर्विकाणां सीमानः उल्लङ्घ्यैव गच्छेत् अध्यापकः विद्याभ्यासश्च  तथापि तत्रत्य सत्ताः न प्रमार्जनीयाः कदापि। अध्यापकं अनुवर्तमानस्य तस्मिन् श्रद्धां विश्वासं च छात्रस्य भवेत् तर्हि वयमस्माकं पूर्विकान् गुरूपदेशान् न उत्सृजेम ।

ज्ञानेनाज्ञानेन च साकमेव धीराः साहसिकाश्च भूत्वा अग्रे गच्छन्तु इति ताः अनुशासति । अद्यतनछात्रः लघ्वीं अपि काञ्चन समस्यां परिहर्तुं असमर्थः । आपदां पथि सञ्चरितुं शक्तिः तस्य नास्ति । छात्रेषु परिणामान् आनेतुं कश्चिदध्यापकः एव शक्नुयात् । अध्यापकान्  समादर्तुं विश्वसितुं च विद्यार्थिनः सन्नद्धा भवेयुः । छात्रान् दिशाभ्रंशात् वारयितुं न भवितुं गुरवः अपि प्रतिज्ञाबद्धाः भवेयुः ।

……..✷♦✷……..

षोडशः अध्यायः

# केरलस्य सांस्कारिकवैशिष्ट्यानि

केरलानाम् अनुपमां भूप्रकृतिं, संस्कारान्, आचारानुष्ठानानि, विज्ञानसम्पदश्च अन्विष्य यदा वैदेशिकाः अपि अत्र समागच्छन्ति तदा अस्माकं शिक्षणशैली अपि तद्वत् आकर्षणीया, उत्कृष्टा च आसीत् । विज्ञानार्जनोपाधिषु अन्यतमः ग्रन्थशालाः तत्र तत्र विद्यते चेदपि अस्माकं छात्रो तान् बहुधा न समाश्रयते ।

पौराणिककालेषु राज्ञां प्रभूणां च अन्तःपुरेषु ब्राह्मणानां गृहेषु च बृहत्यः ग्रन्थशालाः आसन् । एतदतिरिच्य रामायणमहाभारतादिश्रेष्ठग्रन्थाः प्रायशः सर्वेषामपि गृहेषु अवर्तन्त । अध्ययनाय आवश्यकाः सकलाश्च ग्रन्थाः तत्र लभ्यन्ते स्म । शास्त्रीयग्रन्थाः, काव्यनाटकादिग्रन्थाश्च तत्रासन् । केरलीयैः अपठितं किमपि शास्त्रं नासीदिति वक्तुं शक्यते । केरलीयाः एवं वैदेशिकाश्च ग्रन्थाः यत्र आसन् ते ग्रन्थालयाः साम्प्रतं जीर्णीभूय नामावशेषाः सञ्जाताः ।

ईदृशीनां पद्धतीनां पुनरुद्धारणं अवश्यं कार्यम् । यतः अमूल्यानि अमोघानि च ज्ञानभाण्डागाराणि अद्य विस्मृतिपथं प्राविशन् । संस्कारापचयस्य हेतुत्वेन एतत् सर्वमपि गण्यते । नानाविध कुलकर्मणामपि ज्ञानं तेषु ग्रन्थेषु समाहृतमासीत्। वैद्य-ज्योतिष-गणित-ज्योतिश्शास्त्र-आयुर्वेद-कला-साहित्यादिग्रन्थाः इदानीं नष्टप्रायाः।

पुरातनकाले प्राथमिकस्तरेषु एव वैद्यगणितज्योतिषपुराणेतिहासकला-साहित्यानि छात्रैरधीयन्ते स्म । केरले संस्कृतपठनाय अत्यधिकप्रोत्साहनं दीयते स्म । तत्र प्रथमं लघुकृतयः क्रमेण बृहत्काव्यानि च अधीयन्ते स्म । उपरिपठनाय अपि तत्र सौकर्यम् आसीत् । पुरा हि राजसदस्सु विद्वत्सभाः सम्मिल्य विदुषां पाण्डित्यप्रदर्शनं शास्त्रचर्चाश्च प्रचलन्ति स्म । तादृग्सदांसि अन्येषामपि उपकाराय आसन् ।

कति वा कृतयः तात्कालिकाः विद्यार्थिनः व्यरचयन् ? ईदृशमेव वैदिकपठनाय अपि केरलेषु महत्प्राधान्यं कल्पितमासीत् । मन्दिरैः साकं मठेषु च वैदिकपाठशालाः प्रावर्तयन्त ।

अष्टाङ्गवैद्यव्याकरणवेदान्तादयः पुरातनकालादारभ्यैव शिक्षणपद्धत्याः भागः आसीत् । कथाकेलिः, सङ्गीतम्, इतरक्षेत्रकलाः, शिल्पशास्त्रं, तन्त्रविद्या च संस्कृतेन सम्बद्धमासीत् । कौटिल्यस्य विश्वविख्यातमर्थशास्त्रं, राजनीतिः एतस्य सर्वस्यापि संस्कृतेन सह अभेद्यबन्धः आसीत् । क्षेत्रप्रकीर्तनपरकाः ग्रन्थाः अपि अस्यां भाषायां विरचिताः आसन् । संस्कृतभाषा केवलं कस्यचन श्रेष्ठविभागस्य उपयोगाय न कल्पते स्म। नानाविभागीयाः संस्कृतमधीत्य शास्त्रविशारदाः सञ्जाताः इति केरलसाहित्यचरितपठनेनावगम्यते ।

वास्तुशास्त्रे अतिप्रगल्भाः आचार्याः अत्रासन् । तन्त्रसमुच्चयस्यैव अध्येतारः नैको आसन् । बहूनि नाटकानि महाकाव्यानि साहित्यग्रन्थाश्च अत्र

समुदिताः । मेल्पत्तूर् प्रबन्धाः, मानवेदस्य पूर्वभारतचम्पूरित्यादयः उत्कृष्टचम्पूग्रन्थाः भवन्ति । एवमेव सन्देशकाव्येष्वपि केरलीयानां योगदानमासीत् । स्त्रोत्रकाव्यसाहित्ये केरलस्य अद्वितीतीयस्थानं कल्प्यते । अगण्याः व्याख्यानग्रन्थाः अपि केरलभूमौ समजनिषता विद्वत्सभासु चर्चासंवादाक्षरश्लोकसदस्सु च संस्कृतभाषा जाज्वल्यते स्म ।

अद्य पुनः संस्कृताध्ययने अध्यापने च अपचयः अभवत् । ईश्वरभक्तिः, गुरुभक्तिः, शुचित्वं, विनयः, दया, दानमतिथिपूजनमित्यादयः अनेके गुणाः केरलीयानामासन् । केरलीयसंस्कारस्य अधिकांशः संस्कृतेन सम्बद्धः अस्ति । तस्मादेव अस्याः भाषायाः ह्रासः तद्वारा अस्माकं संस्कृतेः शोषणश्चाभवत् । अतः संस्कृतस्य प्रचारः, स्थानमुपयोगिता च दृढं कुर्यात् ।अस्माकं केरलदेशस्य राज्यान्तरापेक्षया अधिकः आदरः अस्मादेव प्राप्तः ।

शिक्षणद्वारा पारिवारिकोद्धरणं, व्यक्तिविकासः, समाजस्य विकासश्च सम्भवति । अनेके विद्यालयाः सर्वकलाशालाश्च सर्वत्र संस्थापयन्ति चेदपि तेषां मूल्यं सर्वदा अधोगच्छति । किमु वक्तव्यं मातृभाषायाः अपि यथोचितप्राधान्यं न दीयते विद्यालयेषु ।

स्वकार्यसंस्थासु ये अध्ययनं कुर्वन्ति तेषां छात्राणां स्थानमपि नीचं गच्छति। आदर्शशिक्षणादपि केवलज्ञानसम्पादनाय प्रामुख्यं दीयते आधुनिकाः ।तस्मादेव गवेषणानि यथावत् न फलप्राप्तिं यान्ति इति अवगम्यते ।

अद्य पञ्चसप्तत्यधिकनवशताधिकद्विसहस्रविद्यालयेषु पञ्चमकक्ष्यातः आरभ्य संस्कृतं शिक्ष्यते । अरबीभाषामपेक्ष्य न्यूनाः छात्राः संस्कृतं पठन्ति । अरबीभाषापठनं प्रथमकक्ष्यातः आरभ्य विद्यालयेषु अध्याप्यते इत्येव एतस्य हेतुः । माकिं उपत्रिसहस्रं संस्कृताध्यापकाः केरले सन्ति । पूर्वं तु सि.बि.एस्.इ पाठ्यपद्धतिषु संस्कृतं अनिवार्यविषयः आसीत् । परमधुना छात्राः विरलाः इत्युक्त्वा तदपि स्थगयितम् । संस्कृतपठनेन छात्राणां अपर्याप्तता भवतीत्यपि सि.बि.एस् . इ विद्यालयाधिकारी इन्दिरा राजन् अभिप्रैति ।

केन्द्रीयविद्यालयेषु षष्ठकक्ष्यातः प्रारभ्य अष्टमकक्ष्यापर्यन्तं संस्कृतपठनं निर्बन्धितविषयः भवति । नवमदशमकक्ष्यासु यथेच्छं संस्कृतं स्वीकृत्य पठितुं शक्यते । तत्र हि छात्राः संस्कृतं अध्येतुं सन्नद्धाः इति गणनाभिरवज्ञायते ।

कलालयेषु अपि संस्कृतं अधीयन्तः छात्राः सन्त्येव । सर्वकलाशालानां कलाशालासु अपि संस्कृतं पाठ्यविषयत्वेन स्वीकृतमस्ति । केवलं संस्कृतपठनाय काचित् सर्वकलाशाला केरलेषु वर्तते । किन्तु कालानुसृतपरिवर्तनानि तत्र तत्र करणीयानि ।

कैरलीभाषा संस्कृतेन नितरां सम्बद्ध्यते । श्रीनारायणगुरुः संस्कृतभाषायाः प्रचारकेषु अन्यतमः अस्ति । संस्कृते अनेके ग्रन्थाः विरच्यासौ संस्कृतेन विना सांस्कारिकाभिवृद्धिः उपलब्धुं न शक्यते इति सामाजिकान् उदबोधयत् ।

मानवानां सम्प्रति कस्मिन्नपि कार्ये प्रतिबद्धता नैव वर्तते । अस्मान् परितः अगण्याः समस्याः दैनन्दिनं वर्धमानाः दृश्यन्ते । युक्तिवादिनः एतासां समाधानं दातुं न प्रभवन्ति । शास्त्रसत्येषु परिवर्तनानि भवन्ति चेदपि कालातीतानि आध्यात्मिकतत्त्वानि चिरस्थायीनि भवन्ति । मानुषिकसमस्याः अनुदिनं गुरुवराः जायन्ते । किन्तु आसां समस्यानां परिहारः निर्देष्टुं अधिकारिणः प्रशासकाश्च न शक्नुवन्ति ।

उत्तममार्गनिर्देशेन यस्याः कस्याः अपि पद्धत्याः विजयः सुनिश्चितो भवति । भारतस्य देशीयपारम्पर्यं अत्रत्य जनजीवनेन सह सुदृढबन्धं स्थापितमस्ति । इमां विज्ञानपरम्परां मार्गनिर्देशकत्वेन स्वीक्रियते चेदेव अस्माकं समस्यानां परिहारः विधातुं शक्यते । तत् आत्मनिष्ठं व्यक्तिनिष्ठं च वर्तते । इदं सत्यं सम्यग् अवगच्छति तर्हि कोऽपि कमपि पीडयितुं वञ्चयितुं वा न गच्छति ।

द्वितीयलोकमहायुद्धावसरे विस्फोटनवर्षणं कृतवान् अमेरिका देशस्य वैमानिकः गारि डेविस् एकदा स्फोटनस्थानं दूरदर्शिनीद्वारा पश्यन्नासीत् । तेन विनाशितान् प्रदेशान् मानवान् च दृष्ट्वा परिवर्तितमनाः सः पश्चात्तापेन इतः परं तथा न करिष्यतीति प्रतिज्ञाय अमेरिकायाः पौरत्वमपि सन्त्यज्य आरक्षकाणां समीपं गत्वा स्वयं बन्धनस्थः अभवत् । परन्तु अमेरिकादेशं प्रत्येव अधिकारिणः तं प्रतिप्रेषितवन्तः । मार्गमध्ये अर्णवे

उत्पतितं तं अधिकारिणः पादबाहू बद्ध्वा महानौकां प्रावेशयत् । ईश्वरनियोगवत् सः तत्र नटराजगुरुं दृष्ट्वा तदीयः शिष्यः अभवत् । ततः तस्य प्रेरणया 'वेल्ड् गवण्मेन्ट्' नामकसंस्था तेन प्रारब्धा । अनया घटनया ज्ञायते यत् मनुष्या महत्स्थानमलङ्कुर्वन्तु नाम तथापि केचन सन्दर्भाः भवन्ति येन तस्य आत्मबोधः प्रबुद्धो भवति ।

मनुष्यस्य मनोहारिता तस्य मानुषिकमूल्येषु तिष्ठति । तस्य स्नेहे सत्ये, मानविकतायां च सा प्रतिष्ठितं अस्ति । पाश्चात्यसहवर्तित्वेन भारतस्य पैतृकमूल्यानि कदापि न त्याज्यानि । आधुनिकाः नवोत्थाननायकाः जर्जरिताचरान् समूहात् निष्कासयितुं पारयन्ति स्म । तदा तदा ते महापुरुषाः अनपेक्षितान् आचारान् त्यक्त्वा अपेक्षितमूल्यानि स्वांशीकृत्य तानि पूर्वाधिकं भासुरीकृतवन्तः ।

चिरस्थायिनः कस्यचित् समाजस्य द्रुतपरिणामान् वयं पश्यामः । एतच्च भारतस्य भूतकालचरितेभ्यः नितरां भिद्यते । सामाजिकानीतिः राष्ट्रिय कुतन्त्रताश्च अत्र ताण्डवं कुर्वन्ति । एवं तर्हि का गतिः अस्माकं समाजस्य! अस्मदीयानां गुरुवर्याणां आत्मसत्तायाः अन्वेषणे दर्शितान्तरिकलोकेण सह बाह्यलोकमपि सम्मिश्र्य इयं समस्या परिहर्तुं शक्यते । तदर्थं विद्याभ्यासः एव अस्य एकमात्रोपाधिः । श्रेष्ठया अनया मानवसर्जनप्रक्रियया यथार्थमनुष्याणां निर्माणमेव आधुनिककालस्यावश्यकता । केवलं सिद्धान्ताः भाषाश्च अधीत्य परीक्षां लिखित्वा बिरुदसम्पादनेन श्रेष्ठाः आदर्शाः अस्तं गच्छन्ति ।

समाजासम्बद्धेनन किमपि प्रयोजनं न लभ्यते । शिक्षणसम्प्रदाये अस्माकं स्वीयसत्त्वमजानन् अन्यत्सर्वं अध्येतुं या त्वरा प्रदर्श्यते तां निवार्य प्रतिक्षणं अस्माकं मनो-वाक्-प्रवृत्ति मण्डलानि ईश्वराधिष्ठितानि भवन्तु । उपनिषद्भिरुच्चैरुद्घु ष्टस्य सत्यस्य एकत्वावलोकनसमर्थो भवतु अस्माकं विद्याभ्यासः । शाश्वतं, जीवनाय प्रकाशदायकं, प्रयोजनप्रदं, आनन्ददायकं, शक्तिदं च भवतु शिक्षणम् । अस्य मार्गदर्शिकाः वेदोपनिषदः भवन्तु । यावन्तः अपि विषयाः यथाशक्ति अधीयन्ते चेदपि ज्ञानमहासागरस्य कणिकामेव वयं पिबामः । स्पर्धाविवादकलहादिषु अतत्पराहं इदं मम कर्तव्यत्वेन स्वीकृत्य एतावत्कथयामि ।

……..✷♦✷……..

सप्तदशः अध्यायः

# संस्कृताध्ययनं आधुनिकसमाजे - एकमवलोकनम्

शिक्षणं नाम आजीवनान्तप्रक्रिया इत्यतः मनुष्यस्य सर्वोत्तमवरदानस्य आशयविनिमयोपाधेः भाषायाः अत्यधिकं प्राधान्यमस्ति । कस्यचन समाजस्य महत्त्वपूर्णघटकमपि भाषा एव । तस्याः चरितं तदीयसमाजस्य विकसनस्य चरितमस्ति। एवं तर्हि संस्कृतभाषाः अस्माकं सांस्कारिपैतृकस्य साहित्यशास्त्राणां देशीयनवोत्थानोपाधीनां च स्थानमलङ्करोति । वैय्यक्तिकरीत्या अग्रेगन्तुं महद्योगदानं कृतमस्ति भाषया ।

वैदिककालतः एव प्रचुरप्रचारा संस्कृतभाषा राष्ट्रभाषा इव सर्वदेशान् अपि परस्परं योजयति स्म । सुघटितव्याकरणेन अर्थसम्पुष्ट्या उच्चारणसौष्ठवेन मधुरया वाग् घटनया च सुभगा सूक्ष्मा प्रौढा च वर्तते इयम् । मन्त्राणां भाषा इत्यतः देवभाषेति प्रथते एषा भाषा । अत्रत्यः एकैकोऽपि पदसमूहः नियतनियमैः संयुतो वर्त्तते । क्रिस्तोः पूर्वं पञ्चशतवर्षेभ्यः पूर्वमेव पाणिनिसदृशाः वैयाकरणाः व्याकरणनियमान् व्यरचयन् । अनन्ताः शास्त्ररचनाः, विपुला पदसम्पद्, मूल्यानामादर्शानाञ्च आकरजरूपाः वेदाः पुराणेतिहासाः, स्मृतयः, नानाविज्ञानशाखाः, सांस्कृतिकतत्त्वसंहिताः, मतनिरपेक्षता च अस्याः भाषायाः विशेषः भवन्ति । आधुनिकशास्त्राणामाश्रयहेतुश्च वर्तते इयम् ।

युरोपीयभाषापरिवारस्य अतिपुरातनभाषा भवतीयम् । पौराणिकालस्य शिक्षणसम्प्रदायेषु विविधैर्विषयैः साकं व्याकरणं, साहित्यं, तत्त्वशास्त्रं, गणितं, ज्योतिशास्त्रं, राष्ट्रतन्त्रं, राजनीतिः, आयोधनकलाः, आयुर्वेदः, ज्योतिषमित्यादयः अपि अन्तर्गताः आसन् । विजयपूर्णं भौतिकात्मीयजीवनायां एतत् साहाय्यं करोति स्म । उदात्तः एकः गुरुशिष्यबन्धः अस्माकं समाजे अवर्तत । उत्कृष्टचिन्तया ध्यानेन च गुरुणा समार्जिताः विद्याः घनान्धकारे भ्रमतां शिष्याणां चक्षूंषि उन्मीलयन्ति स्म । आत्मनियन्त्रणं, संयमनं, तितिक्षा च अत्रत्य शिक्षणसम्प्रदायस्य विशिष्टः गुणा आसन् ।

भाषाध्ययनाय बहुविशेषाः भवन्ति परन्तु आधुनिकेऽस्मिन् लोके संस्कृतभाषायाः संवर्धनाय अनेके प्रतिरोधाः सन्ति । नित्यजीवने संस्कृतभाषायाः तावत्प्राधान्यं न वर्तते इत्यतः सर्वे इमां तिरस्कुर्वन्ति । विदेशीयानां भारते आधिपत्यस्थापनात्परं संस्कृताधिष्ठिता विद्याभ्यासपद्धतेः क्रमशः परिवर्तनानि अजायन्त। आङ्गलेयं ते बोधनभाषाञ्चाकुर्वन् । किन्तु विल्यम् जोन्स्, चाल्स् विल्किन्सन् प्रभृतयः केचन संस्कृताध्ययनाय प्रोत्साहनमदात् । एषां प्रेरणया एव पश्चात् कोण्वालीस्सदृशैः प्रभुभिः बनारस् सर्वकलाशाला निर्मापिता । सा पुनः संस्कृतस्य केन्द्रमजायत ।

कल्कत्तायां देहल्यां पुण्यपत्तने पश्चात् एतादृश्यः सर्वकलाशालाः प्रारभन्त । माक्स्मुल्लर् महाशयेन संस्कृतभाषा सम्यगधीता तन्मेखलायां

प्रवर्तनमकरोच्च । बौद्धदर्शनस्य अतिप्रसरोऽपि संस्कृताय हितमकरोत् । किन्तु पुनः ईस्ट् इन्ड्या प्रस्थानस्य प्रारम्भेण पुनरपि संस्कृतस्य स्थितिः कष्टपूर्णा जाता । पाश्चात्यसंस्कारस्य अतिप्रसरेणापि अत्र परिवर्तनानि अजायन्त । उन्नतस्थानमानानि दत्वा ब्रिटिश् अधिकारिणः अत्रत्याध्यापकान् बहुत्र विनियोज्य संस्कृतस्य अवगणनां कर्तुमारभन्त ।

मेक्काले प्रभोः विद्याभ्यासनयैः जनेषु भूयांसोः परिणामाः अभवन् । नवमदशमशताब्ध्यां विल्यं बेन्टिक् प्रभोः परिष्कारेण साकं प्रायशः भारते संस्कृतभाषा नामावशेषा जाता । ततः समनन्तरं बहूनां विषयाणां मध्ये अन्यतमा काचिद् भाषेति रूपेण संस्कृतं अध्यापयितुमारब्धम् । 'वुड्स् डेस्पाच्' नियमेन आङ्गलेयं बोधनभाषां च अकरोत् ।

स्वातन्त्र्यानन्तरं पुनरपि इमां प्राधान्येन द्रष्टुमारब्थम् । पश्चात् संस्कृतसर्वकलाशालानां निर्माणेन पूर्वोक्ता शोचनीयावस्था किञ्चिदिव परहताः ततः संस्कृतस्य आधुनिकवत्करणस्य प्रारम्भः अभवत् । तदा तत्र साम्प्रदायिकसंस्कृताध्ययनस्य प्राधान्यं दत्त्वा संस्कृतं बोधनमाध्यममकरोत् । संस्कृतसर्वकलाशाला सम्बन्धिनः कलालयाः विद्यालयाश्च समारभन्त ततः परम् ।

अन्यासु अपि सर्वकलाशालासु संस्कृतमेकविषयत्वेन अध्यापयन्ति। बह्वीषु सर्वकलाशालासु विद्यापीठानि रूपीकृतानि । संस्कृते प्रवीणानां कृते शास्त्री, आचार्या, प्राज्ञविशारदादिबिरुद्धानि दातुं समारब्धानि। विद्यालयेभ्यः सर्वकारेण साहाय्यधनं वितरणं कर्तुं यदा प्रारब्धं तदा संस्कृतस्यापि अङ्गीकारां प्रादात् । परन्तु तदा साम्प्रदायिकशिक्षणपद्धतिः पूर्णतया निरस्ता ।

हूमयूण् कबीरस्य नेतृत्वे पञ्चपञ्चाशदधिकनवदशशते भारतीयसर्वकारस्य शिक्षणमन्त्रालयस्याधीनतायां संस्कृताध्यापकानां एकं सम्मेलनं संघटितम् संस्कृतपुनरुद्धारणाय पद्धतयः आविष्कृताश्च । एतदाधारेण केन्द्रियसर्वकारेण डॉ. सुनीत्कुमार् चाटर्जीमहोदयस्य नेतृत्वे एका समितिः संस्थाप्य संस्कृतभाषायाः शाक्तीकरणाय बहून् मानदण्डान् स्वीचक्रुः ।

नारायणगुरुकुलं, भारतीयविद्याभवनम्, श्रीरामकृष्णमिषन्, अमृतानन्दमयीमठः, विश्वसंस्कृतप्रतिष्ठानमित्याद्याः अनेकसंस्थाः अनौपचारिक-आत्मीय-साम्प्रदायिक-विषयाणां शिक्षणाय प्रादुरभूवन् ।

भारतीयसामूहिकव्यवस्थासु विराजितायाः संस्कृतभाषायाः सा प्रौढिः इदानीं नष्टप्राया समजनि । साम्पत्तिकोन्नमनं अभिलक्ष्य इतरशास्त्रविषयाः यदा आगच्छन् तदा प्रभृति संस्कृतस्यापचयः समारब्धः । अद्यत्वे संस्कृतं

ज्ञानार्जवस्य विवेकस्य च कार्ये इतरशास्त्रैः समं समन्वयनायापि विचाराः सन्ति । संस्कृतपण्डितानां शास्त्रज्ञैः साकं चर्चाः प्रचलन्ति । अस्मिन् वीक्षणे संस्कृतप्रेमिणः सर्वेƒपि श्रद्धा कार्या । इमां श्रेष्ठभाषां तत्सम्पदश्च राष्ट्रविकासाय उपयोक्तुं प्रेरणां अन्तर्दर्शनञ्च दातुं वयं प्रतिज्ञाबद्धाः स्याम ।

आधुनिकशास्त्राणां साङ्केतिकविद्यानाञ्च प्रभावेƒपि जननं, मरणं, शान्तिः, विकाराणि एतेषां विवरणं दातुं ते न शक्नुवन्ति । बाह्यलोकवत् अस्माकं आन्तरिकलोकमपि न गर्हयितुं शक्नोति । एवञ्चेद् तान् सर्वान् अधिकृत्य स्पष्टमाधिकारिकञ्च विज्ञानं यच्छन्त्यः संस्कृतशास्त्रशाखाः वयं किमर्थं तिरस्कुर्मः? किमर्थं ताः विमृश्यन्ते ? शास्त्रविषयाणां परिमितयः तत्त्वशास्त्राणां नास्ति । विश्वविख्यातैः शास्त्रज्ञैः इयं भाषा यदा अङ्गीक्रियन्ते एतद्विषये अज्ञानिनः तदवगन्तुमपि प्रयत्नं न कुर्वन्ति परञ्च इमां नितरां कुत्सन्ति च ।

यत् चैतन्यं पृथिव्याकाशप्रपञ्चादीन् अधिवसति तद् परमचैतन्यमथवा तां बोधसत्तामेव उपनिषदः अस्मान् दर्शयन्ति । एतदेव आधुनिकशास्त्रेण संलक्ष्यते अत्र । मनुष्याणां जयपराजयाणि न भवन्ति, शास्त्रस्यापि जयपराजयाणि न भवन्ति । सनातनं नित्यसत्यं केनापि न पराजीयते । अन्यत् सर्वं अज्ञानात् समुद्भूतानि केवलज्ञानानि भवन्ति । अस्य महाज्ञानस्य स्रोतांसि उपनिषदः। तत्र च प्रवेष्टुं उपाधिः संस्कृतभाषाध्ययनम् एव वर्तते ।

……..✷♦✷……..

# ग्रन्थसूचिका

१. अच्युतन् मावेलिक्कर(डा.), उपनिषत्तित्तिण्टे वेलिच्चम्, ओदेण्टिक् बुक्स्, तिरुवनन्तपुरम्, २०१०.

२. ईश्वरन् एक् ना थ्, दि उपनिषद्स्, जैको पब्लिषिङ् हौस् , चेन्नै, २०१०.

३. एद्विन् एस् .ब्रयान्तः (एडि. & ट्रा.), योगसूत्रा आफ़् पतञ्जलि, नोर्त परिणत प्रेस्स् न्यूयोर्क्, २००९.

४. एम्.आर् .राजेष् (डा.), वेदङ्गळिले शास्त्र दीप्ति, मातृभूमि बुक्स्, कोषिक्कोड्, २००७.

५. कार्टर् क्रिस्, आफ़्टर् सयन्स् & दि आफ़्तर् लैफ़् एक्स्पीरियन्स्, इन्नर त्रडिषन्स,कानडा, २०१२ .

६. केशवन् नायर्, भौतिकत्तिनप्पुरं, डि.सी.बुक्स्, कोट्टयम्, २००१.

७. कोल्लिन्स राण्डल्, दि सोष्योलजि आफ़् फ़िलोसोफ़ि, दि बेल्क्काप् प्रेस्स् आफ़् हार्व्वार्द यूनिवेर्सिट्टि, लण्दोण्, २००२ .

८ . कोवेल् इ .बी.& गौ .ए.इ.(ट्रा ), श्रीमद्सायणमाधवाचार्य सर्वदर्शनसम्ग्रह, भारतीय कला प्रकाशन् दिल्ली, २००८.

९. कृष्णमूर्ति.के.आर्.(प्रोफ़्.)(ट्रा.), अष्टाङ्ग हृदयं, चौखंब कृष्णदास अक्का।दमि, वाराणासि, २०१३.

१०. गोपालन् नायर्  पण्डित (भाषानुवाद ), ब्रह्मसूत्र भाष्यं, दि ईतोस्, त्रिश्शुर्, १९९४.

११. चेतनानन्द स्वामि, गोड  लिव्ड् वित्त् दें, अद्वैत आश्रम कल्कत्त, १९९७.

१२. जवाहरलाल् नेहरू, डिस्कोवरी आफ़् इण्डिय, मातृभूमि  बुक्स, कोषिक्कोड्, २०१४.

१३. ज्ञानानन्त सरस्वती स्वामि(व्या ), महाभारत सर्वस्वं,वाल्यं -  १ & २, आनन्त कुडीरं, कन्याकुमारि, १९९०.

१४. ज्ञानानन्त सरस्वती स्वामि, वेदान्त विज्ञानं, आनन्द कुडीरं, कन्याकुमारि, १९९२.

१५. ज्ञानानन्त सरस्वती स्वामि(व्या), श्रीमदभगवद् गीत, आनन्त कुडीरं, पब्लिकेषन्स्, कन्याकुमारि, १९९२.

१६. तरुवण असीस्, (एडि), विद्याभ्यास चिन्तकळ्, ओलिव् पब्लिकेषन्स्, कोषिक्कोड्, २००७.

१७. ध्यानगुरु ऋषिसागर् (डा.) (व्या), उपनिषत् दर्शनं (१०८ उपनिषद्स्), यूनिवेर्सल्प्रेस्स् पब्लिकेषन्स्, तिरुवनन्तपुरं, २०१४.

१८. दत्त्.एम्.एन्.(ट्रा.), महाभारतम्, वाल्यं १-९, परिमल् पब्लिकेषन्स्, देल्हि, २०१३.

१९. नन्तनं प्रजीष् (ट्रा ), रस्सल् बर्ट्रोण्ड् , विद्याभ्यासं, पापियोण्, कोषिक्कोड्, २०११.

२०. नम्बूतिरि श्रीमान्.डी(व्या), उपनिषद्सर्वस्वं, सम्राट् पब्लिकेषन्स्, तृशिवपेरुर्, २००१.

२१. नारायण भट्टतिरि.वि.के., वेदं धर्ममूलम्, मातृभूमि बुक्स्, कोषिक्कोड्, २०१४.

२२. निगम् विनोद् कुमार्, निगम् सिद्दार्तः, ४० मिनुत्स् वित्त् गोड्, विवा बुक्स, चेन्नै , २०१३.

२३. परमानन्त भारती.जी.स्वामि (व्या ), चतुस्सूत्रि ब्रह्मसूत्र शङ्करभाष्यं, चौखंब सुभारति प्रकाशन्, वाराणासि, २०११.

२४. पलिवाल् .बी.बी.(डा.), मेसेज् आफ़् उपनिषद्स, डयमोण्ड् बुक्स्, देल्हि, २००९.

२५. पिल्लै .जी.के.(डा.), उपनिशद्स फ़ोर् डी मोडेण्  वेल्द, जैको पब्ळिशिङ्
हौस्  कोल्क्कत्त , २००४.

२६. पुल्लाट्टिल् राजेष्(व्या), श्रीमहाभागवतं आर्षस्त्रि पब्लिकेषन्स्,
तिरुवनन्तपुरं, २०१४.

२७. प्रभावानन्त स्वामि ,स्पिरिच्वल् हेरिट्टेज्  आफ़् इण्डिय , श्री रामकृष्ण
मत्त् मद्रास् ,२०१३ .

२८. पैली .एम्.वि.(डा), विद्याभ्यासप्रष्नङ्ल् इन्नले इन्नु नाले, कर्रन्त् बुक्स्,
कोट्टयम्, १९९८.

२९. बालकृष्णन् नायर्.जी(प्रोफ़), वेदान्त दर्शनं उपनिषद् स्वाध्यायं वाल्यं –
१ & २, केरल भाषा इन्स्टिटूट्, तिरुवनन्तपुरं, २०१३.

३०. बालकृष्णन् नायर्.जी(प्रोफ़), श्रीनारायण सम्बूर्ण कृतिकल् (व्या), वाल्यं
– १ & २,केरल भाषाइन्स्टिटूट्, तिरुवनन्तपुरम्, २०१०.

३१. बालकृष्ण: वेङ्गानूर्(डा.) (व्या), अथर्ववेदं, आर्षस्त्रि पब्लिकेषन्स्,
तिरुवनन्तपुरं, २००९

३२. बालकृष्ण: वेङ्गानूर्(डा.) (व्या), ), ऋग्वेदं, आर्षस्त्रि पब्लिकेषन्स्, तिरुवनन्तपुरं, २००९

३३. बालकृष्ण: वेङ्गानूर्(डा.) (व्या), यजुर्वेदं, आर्षस्त्रि पब्लिकेषन्स्, तिरुवनन्तपुरं, २००९

३४. बालकृष्ण: वेङ्गानूर्(डा.) (व्या), सामवेदं, आर्षस्त्रि पब्लिकेषन्स्, तिरुवनन्तपुरं, २००८.

३५. ब्रिट्टाणिक्क एन्सैक्लोपीडिय, ब्रिट्टाणिक्क वाल्यं - १,२,३,४,५,६,७ & ८, शिवकाशी, २००५ .

३६. माणि वेट्टम्,पुराणिक एन्सैक्लोपीडिय, करन्त् बुक्स्, कोट्टयम्, २००१.

३७ .महाशय लाहिरि, दि उपनिषद्स्, एन्ष्यन्त् कृयायोग मिशन्, २०१३.

३८. मुनिनरायण प्रसाद् स्वामि, कर्मवुं पुनर्जन्मवुं, नारायण गुरुकुलम्, वरकल, २०००.

३९. यति नित्यचैतन्य, अवश्यं अनुवर्त्तिक्केन्द विद्याभ्यासं, ओलिव्, २००१.

४०. श्री रन्गनाथस्वामिकल्, उपनिषत्तुक्कलुदे संदेशं, श्री रामकृष्ण मत्त् त्रिश्शुर्, १९९४.

४१. रन्गनाथस्वामिकल्, मारुन्न समूहत्तिनु अनिवार्यमाय शाश्वत मूल्यङ्गल्, वाल्यं १,२,३ & ४ , श्री रामकृष्ण मत्त्, त्रिश्शुर्, १९८७.

४२. राजगोपालाचारि .सी,उपनिषद्स, भारतीय विद्या भवन्, मुम्बै ,२०११.

४३. राज राज वर्म वडक्कुम्कूर् , केरलिय संस्कृत साहित्य चरित्रं, श्री शङ्कराचार्य संस्कृत सर्वकलाशाल कालटि, वाल्यं - १,२ ३,४ ,५ & ६,१९९७.

४४. राथाकृष्णन् .एस् . इण्डियन् फ़िलोसोफ़ि, वाल्यं १ & २, ओक्स्फ़ोर्द् यूणिवेर्ससिटि प्रेस् ,कल्क्कत्त , १९२३.

४५. रामकृष्णपिल्ल. एन्.पूवत्तूर्, केरल संस्कृत विज्ञानकोशम्, करन्तबुक्स्, कोट्टयम् , २००६.

४६. विवेकानन्त साहित्य सर्वस्वं वाल्यं १,२,३,४,५,६&७ श्री रामकृष्ण मत्त् त्रिश्शुर् , १९६२ .

४७. विवेकानन्त साहित्यसंग्रहं, श्री रामकृष्ण मत्त्, त्रिश्शुर्, २०१४.

४८. वल्लत्तोल्, ऋग्वेद संहित, वाल्यं – १ & २, केरळसर्वकलाशाल, तिरुवनन्तपुरम्, १९८१.

४९. शशिधरन्.जी.के.श्रीनारायण गुरुदेव्  दि महर्षि हु मेइड् अद्वैत सयन्स्, मेनि वेल्द पब्लिकेषन्स्, कोल्लं, २०१४.

५०. श्री.अरबिन्दो, दि लैफ़् डिवैन्, दि अरबिन्दो आश्रम्, पोण्दिचेरि, १९१४.

५१. श्री अरोबिन्दो आण्ट् मदर् ओण् फ़िसिक्कल् एदुकेषन् , अरोबिन्दो आश्रम् पोण्डिच्चेरि, २००८ .

५२. श्री .एम्. ऋषीश्वरन्मारुडे दिव्यदर्षनम्, डी.सी.बुक्स्,  कोट्टयम्, २०१४.

५३. श्रीगुरुजि समग्र वाङ्मयं, वाल्यं -  १,२,३,४,५ & ६, संस्कृत भरति, नवदेल्हि, २००७.

५४. श्रीधरन् .पी.के , योगदर्शनम् नूट्टाण्दुकलिलूदे , मातृभूमि  बुक्स्, २०१३.

५५. श्रीमद् भागवत महापुराणम्(विव), गीत प्रेस्स् गोरखपुर्, वाल्यं - १&२,१९९५

५६. श्रीमद् वाल्मीकिरामायणं (विव), गीत प्रेस्स् गोरखपुर, वाल्यं - १&२, २००६ & २००८

५७. श्रीमद् शारदानन्त स्वामि, श्री रामकृष्ण लीलामृतम् वाल्यं -  १ & २, अध्यक्ष श्री रामकृष्ण मत्, त्रिश्शुर् , १९८४.

५८ . श्री विवेकानन्त स्वामिकल्, विद्याभ्यासं, अध्यक्ष , श्री रामकृष्ण मत्त्, त्रिश्शुर्, १९६०.

५९. षण्मुखन् के.के., विद्याभ्यासं भारतीय दर्शनङ्गलिलूडे, कुरुक्षेत्र प्रकाशन्, २०१४.

६०. सर्वेप्पल्ली राधाकृष्णन्,(उपो), दि कल्चरल् हेरिटेज् आफ़् इण्डिय, वाल्यं - १,२,३,४,५,६ & ७, दि रामकृष्णमिषन् इन्स्टिटूट्, कल्कत्त, १९५८

६१. सुब्रह्मण्यशास्त्री. एस्(एडि), श्री.शङ्करभगवद्पादस्य उपनिषद भाष्यं, श्री कृष्णमूर्त्ति मट् प्रकाशन्,वाराणासि, वाल्यं - १,२ & ३,२०११.

६२. स्वामि मृडानन्त,उपनिषत्तुकल्, श्री रामकृष्ण मत्त् त्रिश्शुर्, १९९८.

६३. स्वामि विवेकानन्द, भारतं तस्य समस्या च, संस्कृत भारति, नवदेल्हि, २०११.

६४. सूरी रामकृष्ण शास्त्री (सं.अनु.)इतिहासः संस्कृतिः राष्ट्रीयता च, संस्कृत भारति, नव देल्ली,२०११.

६५. हक्कीं अब्दुल् .ए .के.(एडि.), मारुन्न विद्याभ्यासं , ओलिव् पब्लिकेषन्स , कोषिक्कोड्, २०१०.

६६. हक्सिली आल्डुस्, दि पेरणियल् फ़िलोसोफ़ि, हार्पर कोलिन्स्

पब्लिकेषन्स्, न्युयोर्क ,१९९० .

६७. हिस् इस्तेण् & वेस्तेण्  डिसैप्प्ल्स्, दि  लैफ़् आफ़् स्वामि विवेकानन्त,

अद्वैत आश्रम् कल्कत्त,१९८९.

६८. जेर्णल् ओफ़् दि  अमेरिक्कन् सोसैट्टि फ़ोर् प्सैक्किक्कल्  रिसर्च, वाल्यम् संख्या

३-४,५ वेस्ट ७३, स्त्रीट् , न्युयोर्क, एन्.वै.१००२३.२००४, जुलै -

ओक्तोबर .

........✷♦✷........